PURANETIHASA

ACHARYA 1st YEAR
Course/Paper.3

PART – B

# महाभारतम् (शान्तिपर्वणि १-३० अध्यायाः)

## *Mahābhāratam (Śāntiparvaṇi 1-30 adhyāyāḥ)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमोऽध्यायः

**प्रस्तावना –**

विशालसंस्कृतसाहित्यवाङ्मयस्यास्य सर्वबृहत् काव्यं भवति महाभारतम्। यत्र सर्वेषां ज्ञानविज्ञानानां तत्त्वानां समन्वयो दृश्यते। अष्टादशपर्वसमन्वितेऽस्मिन् विशालमहाकाव्ये शान्तिपर्वाख्यमद्वितीयपर्व समन्वितं वर्तते। अत्र विविधानां सम्वाादानामुपाख्यानां च चित्रणं ग्रन्थस्यास्य महन्महत्त्वं प्रचकास्ति। युधिष्ठिरेण सह नारदमहर्षेः कथोपकथने कर्णस्य शौर्यं तथा तस्य अस्त्रशस्त्रपारङ्गतादि विविधाः विषयाः समुपवर्णिताः सन्ति। एतेषां सविशेषं विवरणं प्रस्तुतमत्र। प्रस्तुतेऽस्मिन् पुस्तके अष्टौ अध्यायाः विराजन्ते। प्रथमोऽध्याये नारदमहर्षेः आगमनं तथा कर्णस्य शापप्राप्तेः सकलरहस्यं समुपवर्ण्यते। युधिष्ठिरस्य प्रश्नकरणादि विषयाः अत्यन्तं मार्मीकतया प्रतिपादिताः सन्ति। भार्गवस्य शिष्यत्वस्वीकारं तथा शापप्राप्तेः विस्तृतचरित्रं युधिष्ठिरस्य प्रश्नानां समाधानं महत्वैशिष्ट्यं काव्यसौन्दर्यतां च प्रतिपादयति।

**उद्देश्यानि —**

अध्यायेऽस्मिन् पाठकाः एतान् सर्वान् विन्दून् वेदिष्यन्ति।

- नारदयुधिष्ठिरयोः सम्वादः
- युधिष्ठिरस्य कर्णविषयकपरिप्रश्नाः
- कर्णस्य ब्रह्मास्त्रप्राप्तिः अभिशापप्रप्तिश्च
- कलिङ्गकन्यायाः स्वयम्वरः
- दुर्योधनेन कन्यापहरणम्

## नारदयुधिष्ठिरयोः सम्वादः —

कदाचित् महाभारते कुरुक्षेत्रे युद्धसम्पन्नानन्तरं पाण्डवादयस्तथा भरतकुलस्त्रियः सर्वेषां सुहृदां कृते जलदानादि कर्म अकार्षीषुः। ततः चित्तशुद्ध्यर्थं कुरुनन्दनाः पुरात् बहिः एकमासं यावत् निवर्तयिष्यन्तः गङ्गातीरे प्रतस्थिरे। ततः धर्मात्मानं युधिष्ठिरं प्रति केचन सिद्धाः महर्षयः ब्रह्मर्षिसत्तमाश्च समाजग्मुः। तदानीं नारददेवलवेदव्यासदेवस्थानकण्वप्रभृतयः ऋषयः तथा तेषां शिष्याः समुपस्थिताः आसन्। ततः ऋषयः प्रोचुः हे युधिष्ठिर! समेषां बाहुवीर्येण माधवस्य प्रसादेन धर्मेण च सम्पूर्णां पृथिवीं विजित्य मोदसि किम्? निहितेष्टमित्राणां शोकः किं त्वां न प्रबाधते? ततो युधिष्ठिरः उवाच- श्रीकृषस्तथा बाहुवलेन वयं सर्वे विजिताः परन्तु मम ज्ञातिक्षयमिमं महत्दुःखं हृदि वर्तते। सौभद्रं द्रौपदेयांश्च घातयित्वा इदमहमप्राप्नोत्। नारदं प्रति युधिष्ठिरः कथयामास हे नारद! योऽसौ नागायुतवलः अद्वितीयपराक्रमी संयमी धृतराष्ट्रपुत्राणामभयस्वरूपः अमर्षी नित्यसंरम्भी कर्णः अस्माकं मातुः कुन्त्याः गुढ़ोत्पन्नः पुत्रो वर्तते।

बोधप्रश्नाः –

१. युधिष्ठिरस्य समीपे के के आसन् ?

२. कुत्र नारदयुधिष्ठिरयोः कथनं बभूव?

## कर्णस्य अभयदानम्

कुन्ती महाभारतयुद्धे स्वपुत्राणामभयप्राप्तिनिमित्तं कर्णस्य कूटीरं प्रति जगाम। तत्र कर्णं स्वपुत्रमिति अब्रवीत्। ततः कर्णः तामुवाच केनचिदपि दुर्योधनं त्यक्त्वा न गच्छामि। यदि एतादृशमाचरामि अनायनृशंसकृतघ्नादयः गुणाः च मे स्युः। यदि युधिष्ठिरेण सह सन्धिं करोमि तर्हि जनः रणे भीतो मंस्यते। ततः माता कुन्ती चतुर्णां पुत्राणामभयं देहीति प्रार्थयामास। कर्णः वेपमानः सन् अन्यान् चतुरः सुतान् वशप्राप्तेऽपि न हनिष्यामीति

अब्रवीत्। ध्रुवं भवत्या: पञ्चपुत्रा: भविष्यन्ति पार्थे हते सकर्णा: कर्णे हते सार्जुनाश्चेति कर्ण: प्राह:। पुत्रगृद्धिनी कुन्ती तत: स्ववेश्मनि कर्णं विसृज्य ययौ।

बोधप्रश्न: –

१. कर्ण: मातरं किं अवादीत्?

२. धृतराष्ट्रपुत्राणामभयस्वरूप: क:?

## युधिष्ठिरस्य कर्णविषयकपरिप्रश्ना:–

सर्वेषां मुनीनां पुरत: युधिष्ठिर: कर्णस्येतत् सर्वं रहस्यं प्रकटयामास। पुन: युधिष्ठिर: एतत् सर्वं पश्चादहमज्ञासिषमिति अब्रवीत्। तस्य कर्णस्य निधनं कृत्वा मम हृदयं मे सर्वदा दूयते यतोहि कर्णार्जुनसहायेन अहं वासवमपि कदाचित् जयेयम्। यदा कर्णस्य रूक्षा: वच: शृणोमि तदानीं मम मनसि वहु कोप: समायातो भवति परन्तु तस्य कुन्त्या सदृशौ पादौ निरीक्ष्य कोप: नश्यति स्म। तत: युधिष्ठिर: नारदं प्रति पप्रच्छ हे मुनिश्रेष्ठ ! कथं संग्रामे पृथिवी तस्य चक्रम् अग्रसत्? यथातथ्य सर्वं भवान् वेद। अत: सम्पूर्णं रहस्यं श्रोतुमिच्छामि; तद् ब्रुहि ।

बोधप्रश्ना:

१. युधिष्ठिर: कं पप्रच्छ?

२. कस्य पादौ कुन्त्या: पादसदृशौ?

## कर्णस्य शापप्राप्ति: –

युधिष्ठिरस्य वचनं श्रुत्वा महर्षि: नारद: कर्णस्य शापप्राप्ते: सकलं रहस्यं कथयामास। कर्णार्जुनयो: सम्मुखे न कोऽपि रणे स्थातुं शक्नोति। अत: हे राजन्! देवानामपि गोपनीयं कर्णस्येतत् चरित्रं भवत: पुरस्तात्

कथयिष्यामि। कदाचित् ब्रह्मा सम्पूर्णक्षत्रगुणयुक्तं पुरुषमेकं कुन्त्याः गर्भे सूर्यद्वारा स्थापयामास। सः कर्णः भीमस्य बलम् अर्जुनस्य लाघवं भवतः बुद्धिं नकुलसहदेवयोः विनयं तथा बाल्यकाले अर्जुनेन सह श्रीकृष्णस्य मित्रतां प्रजानां भवत्सु अनुरागं दृष्ट्वा व्यदह्यत। अनन्तरं बाल्यकाले सः दुर्योधनेन सह मित्रतां चकार तथा भवतां समेषां द्वेषी बभूव। ततः कर्णः द्रोणाचार्यं प्रति गत्वा ब्रह्मास्त्रशिक्षां ग्रहीतुं अब्रवीत्। द्रोणाचार्यः अर्जुनं प्रति सापेक्षं दौरात्म्यं विदित्वा तमुवाच यथावत् व्रतचारी ब्राह्मणः क्षत्रियः तपस्वी वा ब्रह्मास्त्रस्य ग्रहणं कुर्यात् नान्यः कश्चित्।

ततः कर्णः महेन्द्रपर्वतं प्रति जगाम। सः कर्णः भार्गवपर्शुराममुपागम्य शिरसाप्रणिपत्य ब्राह्मणमिति कथयित्वा शरणमभ्यगच्छत्। प्रसन्नः सन् भार्गवः तं प्रतिजग्राह तथा अत्रैव उष्यतामिति उवाच। ततः कर्णस्य महेन्द्रपर्वते यक्षगन्धर्वराक्षसैः सह समागमोऽभवत्। तत्रैव सर्वां धनुर्विद्यां समधीत्य समेषां प्रियः बभूव। कदाचित् सः सूतजः धनुः धृत्वा आश्रमस्य समीपे परिचक्राम। दैववशादज्ञानतः कस्यचिदग्निहोत्रप्रसक्तस्य ब्रह्मवादिनः होमधेनुं जघान। कर्णः तस्य च महर्षेः समीपं समागत्य अज्ञानतः तत् कृतमिति न्यवेदयत्। ततः महर्षिः तं कर्णं प्रत्युवाच – हे कर्ण! त्वं नित्यं येन सह विस्पर्धसे तेन सह युद्धसमये भूमिः तव चक्रं ग्रसिष्यति। रथचक्रं पृथिव्या ग्रस्ते तव मूर्धानं पातयिष्यति। त्वया प्रमत्तेन यथेयं गौः हता प्रमत्तस्यैवमेवान्यः शिरः पातयिष्यति। ततः कर्णस्य रथचक्रं भूमिः अर्जुनेन सह युद्धसमये अग्रसत्।

बोधप्रश्नाः –

१. महेन्द्रपर्वते कः आसीत्?

२. कः ब्रह्मवादिनः ब्राह्मणस्य धेनुं जघान?

३. कर्णः केन विस्पर्धते ?

## कर्णस्य ब्रह्मास्त्रप्राप्ति: तथा पर्शुरामस्य शाप:–

भार्गवपर्शुराम: कर्णस्य सेवाशुश्रूषया संयमेन प्रणयेन दमेन च तुतोष। अनन्तरं कर्णाय स: भार्गव: सकलरहस्येन सह ब्रह्मास्त्रस्य उपदेशं ददौ। विदितास्त्रस्तत: कर्ण: धनुर्वेदे बहुयत्नं चकार। तत: कदाचित् मुनिश्रेष्ठ: पर्शुराम: उपवासेन कर्णेन सह विभ्रमन् कर्शित: बभूव। गुरु: पर्शुराम: कर्णस्य जङ्घमाधाय सुष्वाप। कश्चित् श्लेष्ममांसशोणितभोजन: दारुणस्पर्शयुक्त: कृमि: कर्णस्य समीपे समागत:। गुरोर्भयात् कर्ण: तं कृमिं क्षेप्तुमशक्नोत्। कर्ण: कृत्स्नां वेदनां विनिगृह्य भार्गवं धारयामास। यदा कर्णस्य रुधिर: भार्गवस्य शरीरं परिस्पृष्ट: तत: सन्तप्त: सन् तमब्रवीत् किमिदं क्रियते त्वया? अलर्कनाम्ना स: कृमि: अष्टपदयुक्तं तथा तीक्ष्णदंष्ट्रयुक्तं च वर्तते। तत: अन्तरिक्षे मेघवाहान: लोहितग्रीव: कृष्णाङ्ग: करालवान् कश्चित् राक्षस: ददृशे। तं मुनिसत्तमं प्राञ्जलिर्भुत्वा पूर्णमानस: बभाषे – हे भृगुशार्दुल ! अहं यथागतं गमिष्यामि। तं राक्षसं मुनिश्रेष्ठ: पप्रच्छ किमर्थं नरके प्रतिपन्न: तत् ब्रवीहि। गृत्स नाम्ना एक: क्रुर: राक्षस: आसीत्। भृगुस्तुल्य मम शरीरमासीत् । भृगो: सुदयितां भार्यां बलादहमपहृतवान्। तत: तस्य शापात् कृमिरूपेण भूमौ पतित:। सर्वदा नरके भवान् मलमूत्रादीन् प्रतिपत्स्यते। भवत: सकाशात् पापयोनित: विमुक्तोऽहम्।

तत: भार्गव: पर्शुराम: कर्णं प्रत्युवाच हे मूढ़! अतिदु:खमिदं कष्टं ब्राह्मण: कदाचिदपि न सहेत्। केवलं क्षत्रियस्यैव धैर्यं तावत् वर्तते। कर्ण: शापभीत: प्रसादयन् तमुवाच ब्राह्मणक्षत्रिययो: जात: सूत्तोऽहम्। राधेय: कर्ण: इति सर्वे मां जानन्ति। अत्यन्त: क्रुध: सन् पर्शुराम: तमुवाच यथा मिथ्योपचारित: त्वया अस्त्रादिकं शिक्षितं, अन्तिमकाले ता: विद्या: न प्रतिभास्यति। एवं रूपेण कर्ण: तस्मात् स्थानात् उपजगाम।

बोधप्रश्ना: –

१. कीडाया: पूर्वजन्मनि किं नाम आसीत्?

२. भृगु: कस्मै अभिशापं ददौ?

## कलिङ्गराजकन्यायाः स्वयम्वरः –

कदाचित् सर्वे राजानः कलिङ्गराजाचित्राङ्गदस्य स्वयम्वरं प्रति आजग्मुः। तत्र शतं राजानः श्रीमद्राजपुरं नाम नगरं प्रति कन्यार्थं समुपागताः। दुर्योधनः अपि सुवर्णभूषितरथे उपविश्य कर्णेन सह ययौ। शिशुपालजरासन्धभीष्मककपोतरोमानीलरुक्मेत्यादयः सर्वे नृपतयः संप्रवृत्ते महोत्सवे कन्यार्थे उपागताः। स्त्रीराज्याधिपतयः सृगालाशोकभोजराजशतधन्वाचेत्यादयः समाजग्मुः। अन्ये प्राच्योदीच्यां दक्षिणां देशमाश्रिताः सर्वे राजानः अपि समुपस्थिताः आसन्। समुपविष्टेषु तेषु राजसु कन्या रङ्गं प्राविवेश। सा वरवर्णिनी कन्या संश्राव्यमाणेषु राज्ञां नामसु धार्तराष्ट्रमपि अत्यक्रामत्। ततः वीर्यमदमत्तत्वाद्भीष्मद्रोणावुपाश्रितः दुर्योधनः रथमामरोप्य तां कन्यां आजुहाव। ततः पराक्रमी कर्णः अस्त्रादि धृत्वा दुर्योधनस्यानुगमनं चकार। ततः सर्वे राजानः अस्त्रं गृहीत्वा युद्धं चक्रुः। कर्णः धनूंषि सर्वान् नराधिपान् एकैकेन क्षुरेण भूतले न्यपातयत्। ततः सर्वे राजानः भग्नमनसा रणं त्यक्त्वा व्यपेयुः। ततः दुर्योधनः तां कन्यां स्वीकृत्य हस्तिनापुरमाजगाम।

बोधप्रश्नाः –

१. कस्मिन् प्रदेशे स्वयम्वरः बभूव ?

२. कः दुर्योधनाय अभयं ददौ ?

**पारिभाषिकशब्दाः —**

**भास्वरः — तेजस्वी**

**फाल्गुनः— अर्जुनः**

**सारांशः —**

महाभारतयुद्धस्यानन्तरं सर्वे जनाः सुहृदां कृते जलदानादि कर्मणि लिप्ताः बभूवुः। गङ्गानद्या तटे आत्मनः शोकान्मुक्त्यर्थं युधिष्ठिरः मासमेकं अतिष्ठत्। तत्र सः ऋषीन् दृष्ट्वा आत्मनः दुःखं प्रतिपादयामास। सर्वेऽपि युधिष्ठिरं शोकात् विनिर्मुक्तः सन् राज्यं शासितुं प्राहुः। परन्तु शोकसंविग्नमनसः युधिष्ठिरस्य मनसि महान् खेदः समुपागतः। कर्णेन सह स्वस्य सम्बन्धस्य तथा कर्णस्य शापप्राप्तेः विषयं युधिष्ठिरः नारदं प्रति पप्रच्छ। ततः नारदः सर्वं रहस्यं युधिष्ठिरस्य समीपे प्रबोधयामास। नारदेन कुन्त्याः पुत्रस्य कर्णस्य बलशौर्यप्राक्रमदीनां समुपवर्णनं कृतं। भार्गवपर्शुरामस्य शिष्यत्वेन सर्वाः विद्याः तेन शिक्षिताः । ब्रह्मास्त्रप्राप्तेः तथा तस्य शापप्राप्तेः सर्वं नारदः अब्रवीत्। राज्ञः चित्राङ्गदस्य कन्यायाः स्वयम्वरं प्रति आगतानां राज्ञां विषये तथा तत्र कर्णस्य पराक्रमस्य वर्णनं प्रतिपादितम्। जरासन्धेन सह कर्णस्य युद्धः तथा मल्लयुद्धविषये प्रतिपाद्यते। प्रीत्या जरासन्धेन मालिनीनगरी कर्णाय दत्ता। तथा दुर्योधनेन स्वयम्वरात् कलिङ्गकन्यायाः हरणप्रसङ्गः समुपवर्णितो वर्तते।

# आदर्शप्रश्ना:

## लघूत्तरीयप्रश्ना:

१. युधिष्ठिरस्य नारदं प्रति प्रश्नः ।

२. नारदयुधिष्ठिरयोः सम्बादः।

३. कर्णेन ब्रह्मास्त्रप्राप्तिः।

## विश्लेषणात्मकप्रश्ना:

१. कर्णस्य शापप्राप्तेः वृतान्तं स्पष्टयत।

२. कलिङ्गराजकन्यायाः अपहरणं वर्णयत।

३. पर्शुरामस्य कर्णाय शापप्रसङ्गः लिखत।

## निबन्धात्मकप्रश्ना: –

१. नारदस्य कर्णविषयकं रहस्यं विशदयत।

२. कर्णस्य चरित्रं स्पष्टयत।

३. युधिष्ठिरनारदयोः कथोपकथनं वर्णयत ।

## एकाङ्कप्रश्ना: –

१. शान्तिपर्व कस्मिन् ग्रन्थे वर्तते ?

२. महाभारतं केन रचितम् ?

३. युधिष्ठिरः कुत्र विहरन् आसीत् ?

४. कर्णस्य गुरुः कः ?

५. कलिङ्गराज कः आसीत् ?

६. कलिङ्गराजकन्यायाः हरणं कः चकार ?

७. दुर्योधनस्य पिता कः ?

८. अर्जुनस्य गुरुः कः ?

९. सूतजस्य कर्णस्य माता का ?

१०. अङ्गदेशस्य राजा कः ?

११. कुन्त्यै अभयं कः ददौ ?

१२. कः अर्जुनाय क्रुध्यति ?

१३. भृगोः सदृशं कस्य शरीरमासीत् ?

१४. पूर्वजन्मनि कृमिः कः आसीत् ?

१५. भार्गवः इति कस्य नाम भवति ?

## उत्तराणि

१. महाभारते २. व्यासदेवः ३. गङ्गातीरे ४. पर्शुरामः ५. चित्राङ्गदः ६. दुर्योधनः ७. धृतराष्ट्रः ८. द्रोणाचार्यः ९. राधा १०. कर्णः ११. कर्णः १२. कर्णः १३. गृत्सः १४. राक्षसः १५. पर्शुरामस्य

# द्वितीयोऽध्याय:

## प्रस्तावना –

महाभारातात्मके विशाले उपजीव्यकाव्ये शान्तिपर्वणि नारदयुधिष्ठिरयो: कथोपकथने कर्णस्य महत: चरित्रस्य यथा विवरणं प्रस्तुतं नान्यत्र कुत्रचिदपि दृश्यते। प्रागेव कर्णस्य पराक्रमस्तथा अभयदानादि विषया: समुपवर्णिता: सन्ति। द्वितीयेऽस्मिन् अध्याये कर्णस्य बलपराक्रमादीनां वर्णनं, कर्णद्वारा जरासन्धस्य पराजयस्तथा जरासन्धेन कर्णं प्रति अङ्गदेशस्थमालिनीनगरस्य प्रदानप्रसङ्गो दृश्यते। युधिष्ठिरस्य स्त्रीणां प्रति शाप: अत्यन्तं मार्मीकरीत्या प्रतिपाद्यते।

## उद्देश्यानि —

अध्यायेऽस्मिन् पाठका: एतान् सर्वान् विन्दून् वेदिष्यन्ति।

- कर्णस्य बलशौर्यपराक्रमादीनां वर्णनम्
- स्त्रीणां प्रति युधिष्ठिरस्य शाप:
- युधिष्ठिरस्य अर्जुनसमीपे खेदकथनम्
- युधिष्ठिरस्योद्विग्नता
- धनस्य सर्वात्मकता

## कर्णस्य बलशौर्यपराक्रमादीनां वर्णनम् —

कर्णस्य बलप्राक्रमादीन् विज्ञाय मगधनरेश: जरासन्ध: कर्णं द्वैरथयुद्धनिमित्तमाह्वयत्। तत: दिव्यास्त्रविदुषोर्द्वयो: अन्योन्यमभिवर्षतो: युद्धं समभवत्। उभावपि बलान्वितौ क्षीणवाणौ विधनुषौ भग्नखड्गौ महीं गतौ बाहुभि: योद्धुं समसज्जेताम्। तत: बाहुकण्टकयुद्धे कर्ण: जरया श्लेषितस्य देहस्य सन्धिं बिभेद। तत: जरासन्ध: प्रसन्न: सन् अङ्गदेशस्य मालिनी-नाम्नीं नगरीं ददौ। तत: कर्ण: परबलार्दन: दुर्योधनस्य अनुमते चम्पां पालयामास।

तत: देवराज: इन्द्र: त्वद्धितार्थं वर्मकुण्डले भिक्षारूपेण ययाच। देवमायया मोहित: कवचं प्रादात्। विमुक्त: कुण्डलाभ्यां स: निहत: बभूव। एतादृश: कर्ण: महापराक्रमशाली परमधर्मिक:, दानवीर: आसीत्। भूतले तादृश: महारथी कदाचिदपि नाभूत् न भविष्यति च।

बोधप्रश्ना: –

१. जरसन्धेन सह क: युद्धं चकार ?

२. कर्ण: केन हत: ?

## स्त्रीणां प्रति युधिष्ठिरस्य शाप: —

देवर्षि: नारद: एतावत् पर्यन्तं कर्णस्य शौर्यादिकं प्रतिपाद्य विरराम। तत: युधिष्ठिर: शोकपरिप्लुत: तथा चिन्तित: बभूव। युधिष्ठिर: दीनमनस: भूत्वा अध: नयनं कृत्वा रुरोद। दु:खोपहतचेतना कुन्ती तदानीं युधिष्ठिरं प्रति मधुराभाषाम् अब्रवीत्। कर्णं ज्ञापयितुं मया भास्करेण च पूर्व यतित:। वैरस्योद्घुक्षणे रत: प्रतीपकारी इति मत्वा मया अपि स: उपेक्षितो वर्तते। बाष्पकुलेक्षण: धर्मराज: शोकव्याकुलित: सन् तां उवाच-

भवत्या: गूढ़मन्त्रत्वात्पीडितोऽस्मि। अत: सम्पूर्णे जगति स्त्रिय: किमपि गुह्यं धारयितुं सक्षमा: अग्रे कदाचिदपि न भविष्यन्ति। तत: राजा युधिष्ठिर: स्वस्य पुत्रान्, सम्बन्धिसुहृदां मृत्युं स्मरन् उद्विग्नहृदयोऽभूत्।

बोधप्रश्न: –

१. युधिष्ठिर: काभ्य: शापं ददौ ?

## युधिष्ठिरस्य अर्जुनसमीपे खेदकथनम्

युधिष्ठिर: कर्णं महारथं स्मृत्वा सु:खसन्तप्त: सन् शुशोच। तत: पुन: पुन: दु:खशोकाभ्यां आविष्टो नि:श्वसंश्च परित्यक्त्वा शोककर्शितो भूत्वा अर्जुनं प्रति उवाच यदि वयं वृष्णन्धकपुरे भैक्षमाचरिष्याम तर्हि ज्ञातीन्निष्पुरुषान्कृत्वा न इमां दुर्गतिं प्राप्स्याम। अस्माकं शत्रव: कौरवा: इदानीं ऐश्वर्यवन्त: यतोहि क्षत्रियधर्मं पालयित्वा स्वर्गलोकं जग्मु:। आत्मनमात्मना हत्वा कं धर्मं वयं प्राप्नुम:। क्षमा, इन्द्रियसंयम:, दम:,शौचम्, अमत्सर:, सत्यवचनादि वनचारिणां व्यवहार: सर्वोत्तम:। त्रैलोक्यमपि दत्वा कश्चित् अस्मान् न प्रहर्षयेत्। शुना: मांसप्राप्त्यर्थं आत्मन्यात्मनि यथा गृध्यमाना: सन्ति तथैव राज्यप्राप्त्यर्थं वयं सर्वे आत्मन्यात्मनि युद्धं चक्रिरे। वयमेवास्य लोकस्य विनाशे कारणभूता:। अस्माकं वैरपुरुष: निचबुद्धि: दुर्योधन: एतस्य कुलस्य संहारे कारणभूत:। तत् सकाशात् अवध्यानां वधं कृत्वा लोके वाच्यतां वयं प्राप्ता:। राजा धृतराष्ट्र: कुलस्यास्यान्तकरणं दुर्मतिं पापकारिणं पुत्रं राष्ट्रेश्वरं कृत्वा इदानीं शोचति। अस्मिन् युद्धे अस्माभि: सर्वेऽपि शूरवीरा: हता:, अयं शोक: मां सर्वदा रुन्धयति। हे अर्जुन! मनुष्येन कृतं पापं कल्याणद्वारा अपहन्यते। त्यागी पुन: पापकर्मणि लीनो न भवति। वेदेष्वपि अयं समुपवर्णित: यत् त्यागी कदाचिदपि जन्ममरणचक्रे न पतति। अत: समेषां सम्मतिं स्वीकृत्य वनं प्रति गच्छामि। मानवा: यथा इप्सीतानां प्राप्त्यर्थं पापाचारं कुर्वन्ति, तथैव राज्यप्राप्त्यर्थं पापाचरणं कृतवान्। इदानीमेव सर्वं परित्यज्य विशोकविज्वर: सन् कृत्स्नं राज्यं त्यक्त्वा वनं गमिष्यामि। धर्मराजयुधिष्ठिर: एतादृशरूपेण स्वबान्धवान् हत्वा शोकसंविग्नमनसा दु:खितोऽभवत्।

बोधप्रश्ना: –

१. युधिष्ठिर: कस्य समीपे स्वमनोभावं प्राह ?

## युधिष्ठिरस्योद्विग्नता—

वैशम्पायन: जनमेजयं प्रति युधिष्ठिरस्य उद्वेगनतां अस्थिरतां च ब्रुते। कस्यचित् पुरुषस्य अक्षेपापमानं च यथा सोढुं शक्यते तथैव अर्जुन: राज्ञ: युधिष्ठिरस्य दृढ़वाक्यं सोढुं न शक्तवान्। निद्राविजयी अर्जुन: युधिष्ठिरं प्रति उवाच युद्धे जित्वाऽपि किमर्थं अतुलैश्वर्यं न भुङ्क्त्वा दु:खेन जीवति। तं प्रबोधयितुमर्जुन: बहुनीतियुक्तानि वचांसि प्राह:। अलौकिकस्य कार्यस्य परिसमाप्त्यनन्तरं ऐश्वर्यस्य परित्यागं करोति। सम्पूर्णशत्रून् नाशयित्वा क्षत्रधर्मानुसारं स्वराज्यपालनं परमं कर्तव्यं भजते परन्तुं तस्मात् विरतो भूत्वा वानप्रस्थं किमर्थं मनुते ? प्रपञ्चे क्लीवस्य तथा दीर्घसूत्रस्य राज्यभोगसुखं न वर्तते। यदि राज्ये इच्छा नासीत् तर्हि किमर्थं क्रोधेन महीपालान् अवधी:। य: भिक्षावृत्तिं कृत्वा स्वजीवनं निर्वोढुमिच्छति स: लोके विख्यातो न भवति। सर्वान् निहत्य यदि कापालीं वृत्तिमास्थाय जीवति तर्हि लोके किं वदिष्यन्ति। राजकुले जाते कृत्स्नां वसुन्धरां जित्वा मौढ्यात् धर्मार्थावखिलौ त्यक्त्वा वनं प्रतिष्ठते इति अर्जुन: प्रबोधयामास। यथार्थाधिकारी यदि सर्वं त्यक्त्वा वनं प्रति गच्छेत् तर्हि सर्वे दुष्टा: सुकृतकर्माणि लोपं करिष्यन्ति।

**बोधप्रश्ना: –**

१. क: भिक्षावृत्तिं कृत्वा वनं गन्तुमिच्छति ?

२. क्लीवदीर्घसूत्रौ किं कर्तुं न शक्नुत: ?

## धनस्य सर्वात्मकता —

राजा नहुषः निर्द्धनावस्थायां स्वयमेव क्रुरतापूर्णं कर्म कृत्वा अस्मिन् जगति निर्धनतां धिक्कारं चक्रे। सर्वस्वं राज्ञा न त्यक्तव्यम्, परन्तु ऋषीणां धर्मः सञ्चयं न कृत्वा अकिञ्चने उपवेशनम्। अन्यस्य धनं यः कश्चित् हरति सः धनेन सह धर्मस्यापि संहारं करोति। दरिद्रपुरुषस्य समीपे मनुष्यः तं पापी मनुते। अतः अस्मिन् लोके दरिद्रैः न भाव्यम्। अत्र पृथिव्यां पतितः शोच्यते निर्धनश्चापि शोच्यते। सर्वाः नद्यः यथा पर्वतेभ्यः शनैः शनैः विस्तृताः भवन्ति तथैव अर्थेभ्यो सर्वं शनैः शनैः विस्तृताः भवन्ति। धनेन विना अस्मिन् जगति प्राणयात्रां कर्तुं न शक्यते। ग्रीष्मकाले कुसरितो यथा व्युच्छिद्यन्ते तथैव अर्थेन विहीनस्य अल्पमेधसः अपि कार्यं नश्यति। यस्य च अर्थाः वर्तन्ते तस्य बान्धवाः मित्राणि भवन्ति। सोऽपि पण्डितो भवति। धनेनैव सर्वं प्रयोजनं सिद्ध्यति। यथा गजैः महागजाः प्राप्यन्ते।

धर्मार्थकामहर्षक्रोधादयः धनादेव प्रवर्तन्ते। कुलस्य गौरवं धनेनैव वर्धते। निर्धनस्य इहपरलोके च कुत्रापि सुखं न लभ्यते। क्षीणे शरीरे कोऽपि कृशो न भवति परन्तु अश्वगजादीनामभावेऽपि कृशतां सो याति। सर्वेषां जनानां ब्राह्मणादि वर्णानामध्ययनादयः धर्माः भवन्ति परन्तु तदपि अर्थप्राप्त्यर्थं क्रियते। देवैः अपि द्रोहादेव दिवि स्थानानि प्राप्तानि। यथा पितुः धनं पिता ममत्वं ब्रुवते तथैव राजा युद्धे जयं कृत्वा अन्यस्य धनमात्मानं मनुते इत्येव राजधर्मः पूर्वं महर्षिभिः निगद्यते। इयं वसुन्धरा न कस्यचिदेव एकस्य राज्ञः वर्तते । इयं पृथ्वी पूर्वे दिलीपस्य नृगस्य नहुषस्य मान्धातुः अम्बरीशस्य च आसीत्। इदानीं अन्यस्य कस्यचित् हस्तगतोऽभवत्। ततः युधिष्ठिरं प्रति एतादृशं वचनमुक्त्वा सः यज्ञादिकर्माणि कर्तुमुपादिदेश। यः राजा सदक्षिणम् अश्वमेधयज्ञं कृत्वा देवान् यजते तस्य च राज्ञः सर्वाः प्रजाः अवभृतस्नानेन पूताः भवन्ति। कदाचित् महादेवः सर्वमेधयागे आत्मानं जुहाव।

**बोधप्रश्नः –**

१. के पृथिव्याः शासयितारः आसन्?

२. कः सर्वमेधे आत्मानं जुहाव?

**पारिभाषिकशब्दाः —**

द्रविणम् – धनम्

सुक्किणी – वाणी

## सारांशः —

दुर्योधनः कन्यामपहृत्य यदा स्वराज्यं प्रति आजगाम तदानीं सर्वेऽपि राजानः तस्यानुकरणं कृत्वा आजग्मुः। तदानीं कर्णस्य सहायेन दुर्योधनः तां कन्यामपहृतवान्। जरासन्धः कर्णस्य शौर्यं तथा बलपराक्रमं श्रुत्वा युद्धनिमित्तमाह्वयामास। ततः बहुसमयं यावत् युद्धः बभूव। युद्धे शस्त्राणि समाप्तानि जातानि। ततः मल्लयुद्धेन प्रसन्नः जरासन्धः वैरमुत्सृज्य मालिनीं नगरीं तस्मै कर्णाय ददौ। पुनः दुर्योधनस्य अनुमतिं स्वीकृत्य चम्पानगर्याः राजा बभूव। अस्मिन् अध्याये युद्धक्षेत्रे कर्णस्य वीरता शौर्यता च समुपलभ्यते। उद्विग्नस्य युधिष्ठिरस्य चिन्ता तता कुन्तीद्वारा सान्त्वना स्त्रीणां कृते युधिष्ठिरस्य शापप्रसङ्गः महाभारस्य अन्यतमां मधुरतां प्रसादयति। अर्जुनयुधिष्ठिरयोः सम्वादपूर्वकं युधिष्ठिरस्य खेदवर्णनं तथा वनं गन्तुमुद्यतयुधिष्ठिराय अर्जुनः प्रबोधयामास। नहुषराज्ञः दृष्टान्तेन युधिष्ठिरस्य अभिप्रायनिराकरणं तथा धनस्य सर्वात्मकतादयः विषयाः प्रस्तुताः। राजधर्मस्य पालननिमित्तं युधिष्ठिराय प्रबोधनं समुपवर्णितं वर्तते।

## आदर्शप्रश्ना:

**लघूत्तरीरप्रश्ना: —**

१. स्त्रीणां प्रति युधिष्ठिरस्य शापः।

२. युधिष्ठिरस्य उद्विग्नता

३. कुन्तिद्वारा युधिष्ठिराय सान्त्वनम्।

**विश्लषणात्मकप्रश्ना:—**

१. कर्णस्य बलप्राक्रमश्च लिखत।

२. धनस्य सर्वात्मकतां प्रतिपादयत।

३. युधिष्ठरस्य चिन्तां विशदयत ।

**निबन्धत्मकप्रश्ना: —**

१. कर्णस्य चरितं स्पष्टयत।

२. युधिष्ठरेण अर्जुनस्य समीपे खेदकथनं परिशीलयत।

**एकाङ्कप्रश्ना: —**

१. दुर्योधनस्य पितुः नाम किम्?

२. वैशम्पायनः कं कथां श्रावयामास?

३. कर्णः कस्याः पुत्रो वर्तते?

४. कर्णः केन पालितः ?

५. कः आत्मानं धिक्कारं चक्रे?

६. कः धनस्य महत्त्वं प्रतिपादयति?

७. यज्ञानुष्ठानाय कः प्रेरयति?

८. चम्पानगर्याः राजा कः ?

९. जरासन्धः केन पराजितः ?

१०. स्त्रीणां कृते कः शापं ददौ?

११. केन राजधर्मस्य अवश्यपालनीयत्त्वं सूचयति ?

१२. युधिष्ठिर: कस्य समीपे स्वखेदं प्रस्तौति ?

१३. कुन्ति कं प्रबोधयामास ?

१४. कं शोक: रुन्धयति ?

१५. क: राज्यं भोक्तुं न शक्नोति ?

**उत्तराणि—**

१. धृतराष्ट्रस्य २. जनमेजयं ३. कुन्त्याः ४. सुतेन ५. युधिष्ठिर ६. अर्जुनः

७. नारदः ८. कर्णः ९. कर्णः १०. युधिष्ठिरः ११. अर्जुनेन १२. अर्जुनस्य

१३. युधिष्ठिरं १४. युधिष्ठिरं १५. क्लीवः

# तृतीयोऽध्याय:

## प्रस्तावना —

युधिष्ठिरस्य अर्जुनं प्रति स्वखेद वर्णनं पूर्वं यथोचितं सर्वं व्याख्यातम्। अर्जुनस्य पुन: युधिष्टिरं प्रति स्वकर्तव्यपालननिमित्तं कथनादिकं सर्व प्रतिपादितम्। अध्यायेऽस्मिन् युधिष्ठिरस्य वानप्रस्थादि जीवनं यापयितुं निश्चयादिकं वर्णनं दृश्यते। गदाधरभीमेन राज्ञां सन्यासधर्मविरोधादिकं प्रतिपादितम्। तथा आत्मन: कर्तव्यपालनादि प्रस्तुतम्। अर्जुनेन पक्षिरूपधारिण: इन्द्रस्य ऋषिबालकै: सह संवादोल्लेखनपूर्वकं गृहस्थधर्मपालनस्य महत्ता प्रतिपादनं वर्णितं दृश्यते। नकुलसहदेवाभ्यामपि गृहस्थधर्मप्रशंसाद्वारा युधिष्ठिरं प्रति प्रबोधनादिकं सर्वं प्रतिपाद्यते।

## उद्देश्यानि —

प्रिय पाठका: ! अस्मिन् अध्याये भवन्त: सर्वेऽपि एतान् विन्दून् पठिष्यन्ति।

- युधिष्ठिरस्य उद्विग्नता
- कर्तव्यपालनस्य महत्त्वं प्रतिपादनम्
- ऋषिशकुनिसम्वाद:
- गृहस्थधर्मस्य प्रशंसा

## युधिष्ठिरस्य वानप्रस्थसन्न्यासयोः द्वारा जीवनयापननिश्चयः –

यदा अर्जुनः साक्षात् युधिष्ठिरं प्रति कर्तव्यपालनं तथा राजधर्मस्य महत्तं कर्तव्यपालनादिकं विस्तारेण कथयामास तदानीं युधिष्ठिरः अर्जुनं प्रति अन्तरात्मनम् एकाग्रचित्तेन द्रष्टुमब्रवीत्। युधिष्ठिरः मनसि स्वजनानां दुःखेन मोहितो भूत्वा वानप्रस्थे यथा सन्न्यासिनः जीवन्ति तथैव आचरितुं प्रविवेश। वानप्रस्थे सम्पूर्णं ग्राम्यसुखं परिहारं कृत्वा तपस्यायाः अनुष्ठानं मृगानुधावनं च करिष्यतीति युधिष्ठिरः प्रत्यवाच। ततः अन्यत् सर्वमपि कर्तुं युधिष्ठिरः अर्जुनं प्रति प्राहः। यथा जटाजूटं धृत्वा शीतवातातपैः सह क्षुत्पिपासाश्रमक्षमः सन् तपः करिष्यति। पुनः युधिष्ठिरः तमब्रवीत् यत् वने ऋषीणां तथा श्रेष्ठजनानां दर्शनं कृत्वा कालं यापयामि। पितृन्देवांश्च वाग्भिः अद्भिश्च तर्पणं करिष्यामि। एवं शास्त्रेषु आरण्यकानां यद्धर्मः निश्चितः विधिना तत् करोमि। प्रत्यह्नं वृक्षस्य फलं खादित्वा जीवनं यापयामि। पांसुभिः समवच्छन्नः शून्यागारप्रतिश्रयः सन् सर्वं प्रियाप्रियं त्यक्त्वा निवसामि। चतुर्विधान् सर्वान् जङ्गमाजङ्गमान् प्रजाः च समदृष्ट्या अवलोकयामि। सदासर्वदा इन्द्रियसंयमे पयत्नं करिष्यामि। भोजनार्थं यदि न लभ्यते तर्हि भिक्षादिकर्म कृत्वा निर्वहामि। क्रमशः सप्त गृहान् गत्वा भोजनं करिष्यामि। कदाचित् ये जनाः हिंसां करिष्यन्ति तेषामहं कल्याणं करिष्यामि। मनुष्य उन्नत्यर्थं यत् किमपि करिष्यति तदहं न कृत्वा केवलं जीवनधारणार्थं व्यवस्थितो भवामि सङ्कल्परहितो भूत्वा शरीरं धारयामि। सर्वसङ्गेभ्यः विमुक्तः सन् वायुरिव स्वतन्त्रं पृथिव्यां विहरामि। जन्ममृत्युजराव्याधिरूपात्मकस्य चराचरास्यास्य संसारस्य विषयेषु विमुक्तो भूत्वा तिष्ठामि। एतत् सर्वं कृत्वा स्वजीवनं निर्वहामि इति युधिष्ठिरः अर्जुनं प्रति कथयामास।

बोधप्रश्नः —

१. युधिष्ठिरः कुत्र जिगमिषति ?

२. युधिष्ठिरः कं दुःखं !वायामास ?

## भीमेन सन्न्यासधर्मस्य विरोधप्रदर्शनम् —

युधिष्ठिर: परमप्रतापी महायोद्धा तथा धर्मस्य पथप्रवर्तक: आसीत्। परन्तु महाभारतयुद्धे धोरशोक: तं वशीकरोति। शोकसंविग्नमनसा स: सन्न्यासाश्रमं प्रति गन्तुं उद्यतो भवति। सर्वे क्रमश: तं प्रबोधयन्ति परन्तु वनं प्रति गन्तुं स: निश्चिनोति। यदा अर्जुनं प्रति युधिष्ठिर: वानप्रस्थाश्रमे कि करिष्यतीति उवाच तदानीं भीम: तस्य निराकरणं बहु चकार। परन्तु युधिष्ठिर: न मत्वा प्रज्ञावादांश्च भाषते। यथा ज्ञानरहितवेदपाठी वेदं पठन् तस्य बुद्धि: स्तम्भितो भवति तथैव युधिष्ठिरस्य अभवदिति प्रोवाच। पुन: तमब्रवीत् यदि वानप्रस्थाश्रमे स्थातुं मन: आसीत् तर्हि धार्तराष्ट्राणां विनाशे किं फलम्? क्षत्रियाणां कर्तव्यपालने मनसि स्वजनानां कृते दया क्षमादि गुणा: न स्यु:। इमां बुद्धिं यदि प्राक् विद्यमा तर्हि कदाचिदपि शस्त्रं नैव ग्रहीष्याम: तथा न कञ्चन वधिष्यामश्चेति पुन: भिक्षाटनं श्रेयस्करमासीदिति भीम: युधिष्ठिरं प्रति प्राह:। क्षत्रियाणां धर्मो भवति राज्यरक्षणं तथा सर्वेषां जनानां पालनं दुष्टेभ्यो दण्डप्रदानम्। यथा कश्चित् वृक्षमपहृत्य मधु अप्राश्य निवृत्तो भवति तथैव कर्म भवत: इति उवाच। कश्चित् सर्वान् शत्रून् विनाशं कृत्वा स्वयमात्मानं घातयेत् तथैव भवत: कार्यं भवति। यथान्नं क्षुधितो लब्ध्वा न यदृच्छया भुञ्जीत कामी च कामिनीं लब्ध्वा न रमते तथैव कर्म भवतां न शोभते।

बृद्धावस्थायां तथा आपत्काले शत्रुभिर्व्यासितेन संन्यास: स्वीकर्तव्य इति शिष्यते। अरण्येषु केवलं पुत्रपौत्रान्देवर्षीनतिथीन्पितृन् त्यक्त्वा जीवितुं शक्यं। यथा मृगा: वराहा: पक्षिण: अरण्ये स्थितेऽपि न स्वर्गं यान्ति तथैव क्षत्रिय: अरण्ये स्वर्गं न यान्ति। यदि सन्न्यासधर्मेण सिद्धिं प्राप्नोति कश्चित् तर्हि स्थावरा: वृक्षा: सर्वादौ प्राप्स्यन्ति। कर्महीन: मानव: कदाचिदपि सिद्धिलाभं कर्तुं न शक्नोति। यदि केवलं उदकभरणे सिद्धि: लभ्यते तर्हि मत्स्या: जन्तव: सिद्धिमाप्नुयु: सर्वे जन्तव: स्व स्व कर्मणि प्रवृत्ता: भवन्ति कर्म विना न किमपि सिद्ध्यति। अत: राज्यशासनरूपी कर्म क्षत्रियाणां महत् वर्तते इति भीम: युधिष्ठिरं प्रबोधयामास।

**बोधप्रश्न: –**

१. वानप्रस्थाश्रमं प्रति गन्तुं युधिष्ठिरं क: निवारयति?

२. क्षत्रियाणां महान् धर्म: क: ?

**ऋषिशकुनसम्वादः –**

युधिष्ठिरं प्रति भीमस्य सर्वं निराकरणं दृष्ट्वा अर्जुनः अपि भरतश्रेष्ठं युधिष्ठिरं प्रतिबोधयितुं काचिदेकस्याः कथायाः दृष्टान्तं प्रतिपादयामास। देवराजः इन्द्रः कदाचित् ऋषिभिः सह खगरूपं धृत्वा वार्तालापः कृतः। प्राक् उत्तमकुले जाताः बहवः ब्राह्मणाः अजातश्मश्रवः गृहान् परित्यज्य अरण्यं प्रति प्रवव्रजुः। एषः एव धर्मो मन्वानाः सर्वे गृहान्पितॄंश्चैव त्यक्त्वा ब्रह्मचर्ये व्यवस्थिताः बभूवुः। भगवान् इन्द्रः तान् सर्वान् ब्रह्मणान् दृष्ट्वा यज्ञस्यान्नं भुंक्त्वा ये जीवन्ति ते सुदुष्करं कार्यं कुर्वन्तीति बभाषे। अयमेव परमधर्मः ते एव पुरुषाः धर्मपरायणाः भूत्वा परमां गतिं प्राप्नुवन्ति। एतच्छ्रुत्वा ऋषयः प्रोचुः एषः खगः विधसाशान् प्रशंसति। खगः तान् पुनः प्राहः अहं विधसाशीनां प्रशंसां करोमि न भवतां समेषां करोमि। ततः सर्वे ऋषयः तं खगमब्रुवन् हे खग यच्छ्रेयो भृशं तत् ब्रुहि। यदि आत्मानमात्मना न विभज्य शङ्कां न करिष्यन्ति तर्हि यथातथ्यं प्रवक्ष्यामि इति शकुनिः अब्रवीत्। अतः पुनः उत्तममार्गं श्रोतुमिच्छामः वयमिति ऋषयः पप्रच्छुः।

प्रपञ्चे चतुष्पदां गौः प्रवरा, धातूनां मध्ये काञ्चनं श्रेष्ठम्, शब्दानां मन्त्रास्तथा ब्राह्मणो द्विपदां मध्ये श्रेष्ठः। ब्राह्मणानां कृते गर्भाधानजातकर्मादि संस्काराः विधीयन्ते। सम्पूर्णे जीवने संस्काराणां विधिपूर्वकं यथाकालं सम्पादनं कर्तव्यम्। वैदिककर्म भवति ब्राह्मणानां श्रेष्ठतमं कर्म।

**बोधप्रश्नाः –**

१. इन्द्रः केन रूपेण ब्राह्मणान् कथयामास ?

२. चतुष्पदां का श्रेष्ठा वर्तते ?

३. धातूनां किम् श्रेष्ठम् ?

प्रपञ्चे स्थितानां जीवानां सिद्धित्रयं भवति। माघमासादारभ्य आषाढ़मासपर्यन्तं उत्तरायणे गते सूर्ये यस्य मृत्युर्भवति सः आदित्यलोकं याति; तत् क्रममुक्तिः उच्यते। श्रावणमासादारभ्य पौषमासपर्यन्तं दक्षिणायने स्थिते

सूर्ये यस्य मृत्युर्भवति; स: अन्धकारमयमार्गेण चन्द्रलोकं याति। पुन: तृतीये अविमुक्तोपासकानामन्तिमसमये भगवान् रुद्रदेव: स्वयं समागत्य तारकमन्त्रस्योपदेशं करोति तस्मात् ब्रह्मलोकं स: याति; एतत् अनावृत्तिमुक्ति: उच्यते। सर्वे जीवा: सिद्धित्रयं सत्य-पूज्यकर्मणि ईहन्ते। यज्ञस्य सम्पादनं श्रेष्ठकर्म तथा गृहस्थाश्रम: पुण्यमयमेवाश्रमो वर्तते। ये च जना: कर्म निन्दन्त: कुमार्गे गता: भवन्ति; तेषां मूढ़ानामर्थहीनानामेनं पापमेव भवति। शाश्वतान् देववंशान्पितृवंशान्ब्रह्मवंशांश्च संत्यज्य मूढ़ा: अश्रुतीपथं यान्ति। एतान् सर्वानपि स्वभागं समर्पणं कृत्वा गुरोश्चर्यां ब्राह्मणानां परमकर्तव्यं वर्तते। देवा: एतादृशं दुष्करं कार्यं कृत्वा परमैश्वर्यं प्राप्नुवन्ति। वेदोक्तकर्म तपस: तथा प्रजानामुत्पत्तये मुख्यो भवति सर्वेषामाश्रमाणां मध्ये गृहस्थाश्रम: श्रेष्ठरिति वेदवाणी राजते। कामक्रोधादिविवर्जिता: विमत्सरा: विप्रा: धर्मानुष्ठानं परमं तप: इति विदु:। परन्तु वने स्थित्वा मध्यम: इति लोकेषु उच्यते। य: मनुष्य: अतिथिभ्यो देवेभ्य: पितृभ्यश्च धनं दत्वा अवशिष्टान्नं भुङ्क्ते स: विधसाशी इति उच्यते। स्वधर्मे तिष्ठन् मानव: सत्याद्याचरणं कृत्वा संशयरहितं जीवनं यापयेत्।

तत: ते ब्राह्मणा: देवराजेन्द्रस्य धर्मार्थयुक्तं वचनं श्रुत्वा नास्तिकगतिम् उत्सृज्य गार्हस्थ्यं धर्ममाश्रित्य जीवनं यापयन्ति। अत: भवान् अपि धैर्यमालम्ब्य कृत्स्नां पृथिवीं प्रशाधि।

बोधप्रश्ना: –

१. विधशासी क: ?

२. कति सिद्धय: भवन्ति ?

## गृहस्थाश्रमस्य प्रशंसाद्वारा नकुलेन युधिष्ठिराय प्रबोधनम् –

सर्वधर्मभृतां वरं राजानं युधिष्ठिरं प्रति अभिसम्प्रेक्ष्य अर्जुनस्य मुखात् ऋषिशकुनसम्वादं श्रुत्वा नकुल: अपि प्रबोधयामास। विशाखयूपे विशेषत: आग्नि: स्थापनीय: इति देवानामपि प्रसिद्धि: अस्ति। अत: देवा: अपि कर्मणि विश्वसन्ति। वेदोक्तकर्मणि येषां विश्वास: नास्ति तान् नास्तिकानपि पितरश्च जलदानादि कर्मणि प्रवृत्ता:

भवन्ति। विधिपूर्वकं वेदोक्तविधिमुत्सृज्य विप्र: कदाचिदपि स्वर्गं नाप्नोति। वेदविद: अपि गृहस्थाश्रमं श्रेष्ठाश्रम: इति मन्यन्ते।

यज्ञकर्मादि सम्पाद्य ब्राह्मणेभ्यो दानं दत्वा अहङ्कारादिषु विरत: सन् य: तिष्ठति स: सात्विकत्यागी उच्यते। य: च पुरुष: सुखभोग्यं गृहस्थाश्रमं त्यक्त्वा वने तिष्ठति अनशनादि कृत्वा जीवनं यापयति स: तामसत्यागी भवति। वृक्षादीनामध: योगाभ्यासे य: मौनाचरणपूर्वकं तिष्ठति स: भिक्षुकत्यागी उच्यते। क्रोधहर्षावनादृत्य पैशुनं च त्यक्त्वा वेदाध्ययने रतो भवति स: गुरुपूजकस्त्यागी उच्यते। य: मानव: गृहस्थाश्रमे स्थित्वा सकर्मणि सर्वदा प्रवृत्तो भवति स: प्रकृतसन्न्यासी भवति। संन्यासवेशं धृत्वा य: कामानायां युक्तो भवति तं यमराज: मृत्यपाशेन कण्ठे वध्नाति। अहङ्कारवशत: यत् कर्म क्रियते तत् मुक्तिप्रदायकं न भवति। शम-दम-तप-दान-सत्य-पवित्रता-सरलता-यज्ञ-धृति-धर्मादय: सर्वे ऋषीणां विधि: वर्तते। गृहस्थाश्रमे सर्वेषां त्रिवर्गसाधनं मुख्यकर्मरूपेण वर्तते। विरुधा: वृक्षाश्च सर्वे यज्ञार्थं समाहिता: भवन्ति। गृहस्थाश्रम: सर्वान् एकस्यायां मर्यदायां संस्थापयति। एवं ब्रह्मस्वरूपस्य ब्राह्मणस्य संसर्गाभिलाषायां देवा: अपि तिष्ठन्ति। सर्वान् शत्रून् निहत्य यदि पृथिव्यां यज्ञाद्यनुष्ठानं विना आरण्यकधर्मग्रहणं नास्तिकतां प्रतिपादयति। राजसूयाश्वमेधसर्वमेधादि यज्ञा: कर्तव्या: भवन्ति।

राज्ञ: असावधानताया: सकाशात् यदि प्रजा: दु:खिता: भवन्ति तर्हि एतत् विनाशस्वरूपं भवति। गृहस्थाश्रमे स्थितानां ब्राह्मणानां क्षत्रियाणां च कदाचिदपि विनाशं न भवति। अत: क्षत्रियधर्मानुसारं राजा स्वपराक्रमेण पृथ्वीं जित्वा ब्राह्मणेभ्यो धनं च दत्वा अनायसेन प्रजाशासनं कर्तव्यम्।

**बोधप्रश्ना: –**

१. सात्विकत्यागी क: ?

२. क: आश्रम: श्रेष्ठाश्रमो वर्तते ?

## सारांशः –

सर्वेषामवबोधनादनन्तरमपि युधिष्ठिरस्य मनसि ग्लानि न व्यपगता। समेषां वचनानन्तरमपि युधिष्ठिरः वानप्रस्थाश्रमे स्थातुं चिन्तितवान्। अस्मिन् अध्याये युधिष्ठिरः अर्जुनं प्रति वानप्रस्थाश्रमे स्थित्वा किं किमाचरिष्यति इति प्रतिपादयामास। तस्य वचनं श्रुत्वा अर्जुनः पुनः ऋषिशकुनसम्वादं दृष्टान्तरूपेण दत्वा स्वकर्मणि प्रवृतो भवितुं बोधयामास। पुनरपि युधिष्ठिरस्य शोकः न व्यपगतः। ततः अर्जुनस्य वचनं श्रुत्वा नकुलः अपि स्वमधुरया भाषया त्यगयुक्तानां मानवानां समेषां धर्माणां कर्तव्यानां च विवरणं कृतवान्। सर्वेषु आश्रमेषु गृहस्थाश्रमस्य श्रष्ठता प्रतिपादिता। गृहस्थाश्रमेऽपि सर्वधर्मगतानां पुण्यानामर्जनं कृत्वा परलोकं प्रति गन्तुं शक्यते इति अस्मिन् अध्याये भृशं प्रतिपाद्यते।

# आदर्शप्रश्नाः —

## लघूत्तरीयप्रश्नाः —

१. सिद्धित्रयं प्रतिपादयत।

२. त्यागिनां लक्षणं विशदयत।

३. गृहस्थाश्रमस्य वैशिष्ट्यम् ।

## विश्लेषणात्मकप्रश्नाः —

१. आत्मनः कर्तव्यपालनस्य महत्त्वं प्रतिपादयत।

२. नकुलेन बोधितस्य गृहस्थस्य कर्माणि विशदयत।

३. सिद्धीनां स्वरूपं स्पष्टयत ।

## निबन्धात्मकप्रश्नाः —

१. ऋषिशकुनसम्वादस्य समीक्षां कृत्वा लिखत।

२. सन्न्यासधर्मविरोधपुरःसरं भीमेन कथितस्य विषयस्य महत्त्वं प्रतिपादयत।

## एकाङ्कप्रश्नाः —

१. मानवेषु कः श्रेष्ठः ?

२. उत्तमत्यागी कः ?

३. मितभाषी कः ?

४. कति सिद्धयः भवन्ति ?

५. खगरूपेण कः आसीत् ?

६. कः आश्रमः श्रेष्ठतमः ?

७. चतुष्पदां का प्रवरा वर्तते ?

८. धातूनां किं श्रेष्ठम् ?

९. क्षत्रियस्य परमधर्मः कः ?

१०. उत्तरायणे गते सूर्ये मरणे कुत्र स्थितिर्भवति ?

**उत्तराणि —**

१. ब्राह्मणः २. सात्त्विकः ३. नकुलः ४. तिस्रः ५. इन्द्रः ६. गृहस्थः

७. गौः ८. काञ्चनम् ९. प्रजापालनं १०. आदित्यलोके

# चतुर्थोऽध्याय:

## प्रस्तावना —

युधिष्ठिरस्य उद्विग्नतां प्रशमयितुं सर्वेऽपि भ्रातर: स्व स्वधर्मपरिपालनार्थं प्रचोदितवन्त:। अध्यायेऽस्मिन् सर्वादौ सहदेवस्य धर्मपालनं प्रति उदारताभाव: प्रस्तुत:। द्रौपद्या: मुखादपि राजदण्डाधारपूर्वकं पृथ्वीपालनार्थं प्रेरणाप्रदानं वर्णनं दृश्यते। अर्जुनेन राजधर्मस्य राजदण्डस्य च महत्ता प्रतिपादनं वर्ण्यते। युधिष्ठिराय राज्यपालनार्थं समेषामुपदेश: वर्णित:।

## उद्देश्यम्–

**अध्यायेऽस्मिन् सर्वे प्रिय पाठका: एतान् सर्वान् विन्दून् ज्ञास्यन्ति।**

- सहदेवस्य युधिष्ठिराय प्रबोधनम्
- द्रौपद्या राजदण्डकथनम्
- राजदण्डस्य महत्त्वप्रतिपादनम्
- दण्डस्य वैशिष्ट्यम्
- भीमयुधिष्ठिरयो: सम्वाद:

## सहदेवस्य युधिष्ठिराय प्रबोधनम् —

सर्वेऽपि भ्रातरः युधिष्ठिरं दृष्ट्वा स्वस्वविचारपुरःसरं प्रबोधयामासुः। ततः सहदेवः स्वविचारं प्रस्तुतवान्। युधिष्ठिरं प्रत्युवाच – हे भरतश्रेष्ठ! केवलं बाह्यद्रव्याणां परित्यागे सिद्धिः न सम्भवति अपितु आन्तरिकासक्तिरपि परित्यक्तव्या भवति। बाह्यद्रव्यादिविमुक्तस्य यथा सुखलाभं भवति, तथैव तत् सुखं द्विषतां स्यात्। आन्तरिकाभिमानं त्यक्त्वा यथा राजा पृथ्वीं भुङ्क्ते तथैव सुखं अस्माकं सुहृदां स्यात्। ममेति द्व्यक्षरं मृत्युः भवति तथा नममेति त्र्यक्षरं साश्वतं ब्रह्म भवति। ब्रह्ममृत्यू च तौ अदृश्यमानौ समाश्रितौ आत्मन्येव योधयेताम्। यदि एतन्निश्चितं जीवः अमरः तर्हि भूताना विनाशे हिंसा न प्रतिपत्स्यते। यदि शरीरस्य मरणजन्मादि दृष्ट्वा आत्मनः विलीनं चिन्त्यते तर्हि वेदोक्तेषु वचनेषु सत्यतां न भजते।

अतः एकान्तमुत्सृज्य पूर्वैः पूर्वतरैः सद्भिः यः पन्था निषेवितः सः निषेव्यो भवति। कृत्स्नां पृथ्वीं लब्ध्वापि यः पुरुषः न भुङ्क्ते तस्य जीवनमेव निष्फलतां याति। द्रव्येषु यस्य ममता न भवति वन्येन च जीवति तस्य मृत्युः शीघ्रं भवति। हे भारत! ये जनाः भूतानामाभ्यन्तरे आत्मनः सत्तां परिपश्यन्ति ते तु महत्तो भयात् मुच्यन्ते। भवान् एव मम पितामाताभ्रातागुरुश्च इति विचिन्तयन् यत् किमपि मनसि आसीत् तत् कथयामास। एवं रूपेण सहदेवः मनसि स्थितान् विचारान् प्रतिपादयामास।

बोधप्रश्नाः –

१. सहदेवः कं प्रबोधयामास?

## द्रौपद्या राजदण्डकथनम्

सर्वेऽपि भ्रातरः युधिष्ठिरं स्वस्ववचसा प्रबोधयामासुः। परन्तु स्वजनविनाशदुःखे म्रियमाणः युधिष्ठिरः शोकसंविग्नमनसा विरक्तः सन् तिष्ठन् आसीत्। तदानीं द्रौपदी भ्रातृभिः परिवारितं सिंहशार्दुलं युधिष्ठिरं प्रति स्वसिंहासनमारूह्य शासितुमभ्यभाषत। वनवाससमये भवानेव स्वभ्रातरं प्रति सम्पूर्णां मेदिनीं दुर्योधनं हत्वा भोक्ष्यामः इति कथयामसः । परन्तु साक्षात् इदानीं भवानेव क्लिश्यति। यदा विविधान् यज्ञान् करिष्यन्ति तदानीं

वनवासकृतं दु:खं सुखाय भविष्यति। क्लीवपुरुष: कदाचिदपि महीं भोक्तुं न शक्नोति, न च धनमश्नुते। मत्स्या: पङ्के यथा स्थातुं न शक्नुवन्ति तथैव पुत्रा: कदाचिदपि तस्य गृहे न स्थास्यन्ति । नादण्ड: क्षत्रियो प्रपञ्चे प्रतिभाति, भूमिमपि न अश्नुते। हे भारत! नादण्डस्य राज्ञ: प्रजा: सुखमेधन्ति। सर्वभूतेषु दानमध्ययनं तप: च ब्राह्मणस्यैव धर्म: न तु क्षत्रियस्य वर्तते। असतां प्रतिषेध: साधुजनानां रक्षणं समरे अपलायनं च राज्ञां परो धर्मो भवति। यस्मिन् क्षमा-क्रोध-दान-निग्रहानिग्रहादीनां वर्तते स एव धर्मज्ञ: । नाध्ययनेन, न दानेन, न वाक्येन, न च यज्ञेन, न सान्त्वेन पृथिवी भवता लब्धा वर्तते, सर्वान् शत्रून् निहत्य सकलानि राज्यानि प्राप्तानि। हे पुरुषश्रेष्ठ! जम्बुद्वीपेन सह क्रौञ्चद्वीप: शाकद्वीपोऽपि दण्डेन मृदित:। तत: शाकद्वीपसदृश: भद्राश्वद्वीप: त्वया मृदित:।

समस्तानीन्द्रियाणीव भवन्त: सर्वेऽपि मम पञ्चपतय: सकलेषु गुणेषु श्रेष्ठा:भवन्ति। युधिष्ठिर: त्वामनुत्तमे सुखे धात्स्यति। येषां जनानामुन्मत्तक: ज्येष्ठ: भवति सर्वे च तस्य अनुजा: सर्वे सोन्मादा: भवन्ति। उत्कर्षताप्राप्त्यर्थं द्रौपद्या सह सर्वे पाण्डवा: बहुयत्नशीला: अभवन्। तत: द्रौपदी युधिष्ठरं प्रत्युवाच हे भारत! यथा पृथिव्यां राजसत्तमौ मान्धाताऽम्बरीषौ बभूवतु: तथैव इदानीं भवान् प्रतिभाति। तत: सर्वा: प्रजा: पालयन् पृथिवीं देवीं प्रशाधि तथा राजन्विमना भवेति द्रौपदी अब्रवीत्। इदानीं विविधै: यज्ञै: यजस्व तथा ब्राह्मणेभ्यो दानं प्रयच्छेति प्रबोधयामास।

**बोधप्रश्ना: —**

१. ब्राह्मणानां धर्म: क: ?

२. के च द्वीपा: पाण्डवै: मृदिता: ?

३. क: धर्मज्ञ: ?

### राजदण्डस्य महत्त्वप्रतिपादनम् –

युधिष्ठिरस्य मनसि स्वज्ञातिनाशदु:खं मार्मीकतया बिभेद। युधिष्ठिराय सर्वे स्वस्ववचनैः अनुग्रहीतुं प्रयासं चक्रु: परन्तु परमश्रेष्ठस्य युधिष्ठिरस्य मनसि सर्वं त्यक्त्वा वनगमनाय भावना सम्मोहिता वर्तते। द्रोपद्या सह सर्वे भ्रातरः तं युधिष्ठिरं प्रबोधयामास। द्रौपद्याः अनन्तरं अर्जुनः युधिष्ठिरं दण्डनीतेः अनुपालनात्मकं रहस्यं कथयामास। दण्ड एव सर्वासां प्रजानां पालने सहायको भवति। दण्डनीतिरेव सर्वान् सुप्तेषु जागर्ति। दण्डस्य त्रिवर्गसाधनोपायमर्जुनः कथयामास यथा दण्डेन एव धर्मं संरक्षते, दण्डेन अर्थं कामं च संरक्षते। लौकिकमार्गण दण्डमाध्यमेनैव सर्वं धान्यं धनं च सरक्ष्यते। राजदण्डद्वारा पापिनः पापान्मुक्ताः भवन्ति यथा यमदण्डद्वारा परलोकभयादपि पापं जनाः नाचरन्ति। एवं च सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितं भवति। दण्डभयादेव पृथिव्यां सर्वे परस्परं न खादन्ति तथा यदि दण्डः न स्यात् तर्हि सर्वे अन्धे तमसि मज्जेयु:। दुष्टानां दमनं तथा उदण्डानां शासनत्वात् बुधा: एनं दण्डमिति अभिप्रयन्ति।

ब्राह्मणानां दण्डः वाचि क्षत्रियाणां भुजार्पणे वैश्यानां दाने, शूद्राणां दण्डः सेवायां च भवति। सर्वासां प्रजानां संरक्षणार्थं प्रमत्तेभ्यो जगत् रक्षणार्थं दण्डः इति काचिदेका मर्यदा वर्तते। यदा सुनृपः श्यामो लोहिताक्षो दण्डश्चरति तत्र प्रजा: न मुह्यन्ति।

बोधप्रश्ना: —

१. क: दण्डनीते: महत्तां प्रतिपादयामास ?

२. ब्राह्मणानां दण्डः कुत्र वर्तते ?

३. केन राजा प्रजा: पालयति ?

## दण्डस्य वैशिष्ट्यम् —

अर्जुनः युधिष्ठिरं प्रति दण्डस्य माहात्म्यं बहु बोधयामास। बहूनि उदाहरणानि प्रस्तूय दण्डस्य विवरणं समुपस्थापितं वर्तते। इन्द्रः यथा वृत्रासुरस्य वधेनैव महेन्द्रेति समपद्यत तथैव राजा यदि शत्रून् न अपनुदति तर्हि

वित्तं प्रजा: च सर्वा: कीर्तय: अपि विनष्टा: भविष्यति। रुद्रवरुणस्कन्दयमादीनां सर्वे भृशं अर्चनं शत्रूणां हननार्थं भवति। परन्तु मनुष्या: अपि एतेषां देवानां प्रतापं ज्ञात्वा नमस्यन्ति परन्तु ब्रह्मापूषाणं कथञ्चिदपि न प्रणमन्ति। प्रपञ्चे कथञ्चिदपि अहिंसया जीवन्तं लोकं न पश्यमि।

बोधप्रश्न: —

१. कान् मनुष्या: न नमन्ति ?

२. वृत्रासुरं क: हतवान् ?

## भीमयुधिष्ठिरयो: सम्वाद: —

अर्जुनस्य दण्डनीते: तथा हिंसाया: सर्वत्र व्यापकतां श्रुत्वा महाबली भीम: धैर्यमास्थाय राज्यपालनाय तथा प्रजानां पालनार्थं च अब्रवीत्। युधिष्ठिरस्य मनसि दारुणदु:खं दृष्ट्वा भीम: तं युधिष्ठिरं प्रबोधयामास। सर्वे निर्बला: एव विक्लवत्वं यान्ति। सर्वाशास्त्रज्ञ: युधिष्ठिर: कदाचिदपि एनां दीनतां न गच्छेदिति भीम: प्राह:। जगत: वर्तमानभविष्यस्य गति: सर्वं त्वया विदितमिति। अस्मिन् प्रपञ्चे द्विविधो व्याधि: शारीरिकमानसिकश्च जायते। शारीरिकं विना मानसिकदु:खस्य तथा मानसिकं विना शारीरिकदु:खस्य उत्पत्तिरेव न भवति। एतदुभयं परस्परसापेक्षतां भजेते। परन्तु य: पुरुष: शारीरिकमानसिकक्लेशान् मनसि विचिन्तयन् दु:खं लभते तस्य अनर्थो भवति। शीतोष्णादीनां गुणानां साम्यता एव स्वस्थलक्षणं भवति। तेषां गुणानां विकार: यदा उपपद्यते तत: एकेनैकं प्रबाध्यते। तथैव मानसा: गुणा: अपि त्रय: भवन्ति। तत् सर्वं एकेनैकं प्रबाध्यते। कश्चित् दु:खे वर्तमानं सुखं स्मर्तुमिच्छति कश्चित् सुखेऽपि दु:खं स्मरति।

अत: सर्वदा दु:खं विस्मृत्य सुखचिन्तने तथा राजान: राज्यपालने ब्राह्मणा: स्वकर्तव्यपालने रता: भवेयु:। यदि सर्वान् निहत्य वानप्रस्थाश्रमे तिष्ठेत तर्हि सर्वादौ एतदेव स्यात्। धृतराष्ट्रस्य पुत्रान् हत्वा को वा लाभ: ? एतादृशरूपेण बहुविधा प्ररोचना भीमेन युधिष्ठिराय दत्ता वर्तते।

बोधप्रश्नाः —

१. कतिविधं दुःखं भवति ?

२. स्वस्थलक्षणं किं वर्तते ?

३. गुणानां विकारे किं भवति ?

## सारांशः —

नकुलस्य युधिष्ठिरं प्रति गृहस्थाश्रमस्य महत्त्वं कथनादनन्तरं सहदेवः स्वाभिप्रायं कथयामास। भूतानामभ्यन्तरे कथं आत्मनः सत्ता परिपश्यन्ति विद्वांसः इत्यस्मिन् विषये अध्यायेऽस्मिन् प्रतिपादितं वर्तते। राजधर्मस्य महत्त्वं तथा दण्डस्य प्रभावविषये समुपवर्णितं दृश्यते। साक्षात् द्रौपदी युधिष्ठिरं प्रति दण्डेन प्रजापालनं प्रबोधयामास। दण्डनीतेः उपरि भीमयुधिष्ठिरयोः कथोपकथनमुपलभ्यते। क्षत्रियाणां परमकर्त्तव्यस्य स्मारणमध्यायस्यास्य महन्महत्त्वं प्रतिपादयति। गुणानां विकारे शरीरे मनसि च दुःखानि स्वभावतः आगच्छन्ति इति भीमेन प्रतिपादितम्। द्वीपानां विषये अत्र द्रौपदी प्रतिपादयति। तथा सर्वेषां ब्राह्मणानां धर्मः प्रतिपादितः।

## आदर्शप्रश्ना: —

### लघूत्तरीयप्रश्ना: —

१. दण्डस्य महत्तां लिखत।

२. दण्डहीनस्य राज्ञ: स्थितिं लिखत।

३. ब्राह्मणानां कर्तव्यं लिखत।

### विश्लेषणात्मकप्रश्ना: —

१. अर्जुनस्य कथनतात्पर्यं सष्टीकुरुत।

२. क्षत्रियााणां कर्तव्यं प्रतिपादयत।

३. राजधर्मस्य स्वरूपं लिखत।

### निबन्धात्मकप्रश्ना: —

१. द्रौपद्या: दण्डनीतिविषयकप्रबोधनस्य परिशीलनं कुरुत।

२. सहदेवस्य अभिप्रायं स्पष्टयत।

### एकाङ्कप्रश्ना: —

१. कति गुणा: भवन्ति ?

२. दु:खानि कस्मादागच्छन्ति ?

३. ब्राह्मणानां परमधर्म: क: ?

४. कति द्वीपा: भवन्ति।

५. भारतवर्षं कस्मिन् द्वीपे अस्ति ?

६. जना: कान् देवान् न नमन्ति ?

७. राज्ञ: परमधर्म: क: ?

८. केन राजा राज्यं भुनक्ति ?

९. प्रजा: केन स्वकर्मणि प्रवृत्ता: भवन्ति ?

१०. प्रजापालनं कस्य धर्म: ?

११. मानवाः कान् प्रणमन्ति ?

१२. व्याधि कतिधा भवति ?

**उत्तराणि —**

१. त्रयः २. शरीरमानसिकक्लेशात् ३. यजनम् ४. सप्त ५. जम्बुद्वीपे
६. ब्रह्मापूषादीन् ७. प्रजापालनम् ८. दण्डेन ९. दण्डेन १०. राज्ञः ११. रुद्रस्कन्दादीन्
१२. द्विविधा

# पञ्चमोऽध्याय:

**प्रस्तावना —**

भातृप्रिया: अन्ये सर्वेऽपि पाण्डवा: युधिष्ठिरस्य उद्वेगं प्रशमयितुं बहुप्रयत्नपूर्वकं स्वस्वबुद्ध्या स्वविचारान् प्रतिपादयामास। ततोऽपि द्रौपदी स्वपतिं प्रति राजधर्मस्वरूपात्मकं दण्डस्वरूपं प्रतिपाद्य प्रबोधयामास। तत: युधिष्ठिरेण भीमसेनस्य वचनस्य विरोधं कृत्वा मुनिवृत्तीनां ज्ञानिनां महात्मनां च प्रशंसा कृता वर्तते। राष्ट्रस्य धारणार्थं योगक्षेमस्वरूपं प्रतिपादितं। युधिष्ठिरस्य सन्न्यासग्रहणकार्यमवरोद्धुम् अर्जुनेन जनकादीनां दृष्टान्तादिकं प्रतिपादनं श्रुयते। युधिष्ठिरद्वारा स्वपक्षमहत्त्वं प्रतिपादनादिविषया: अध्यायेऽस्मिन् प्रतिपादिता: वर्तन्ते। वैशम्पायनदेवस्थानसम्वादस्य विधिपूर्वकं वर्णनं तथा देवस्थानस्य युधिष्ठिरं प्रति यज्ञानुष्ठानार्थं प्रेरणादिप्रसङ्गा: व्यवस्थिता: सन्ति।

**उद्देश्यानि –**

प्रिय पाठका: ! अस्मिन् अध्याये भवन्त: सर्वेऽपि एतान् विन्दून् पठिष्यन्ति।

- युधिष्ठिरेण भीमवचनस्य विरोध:
- मुनिवृत्तीनां ज्ञानिनां महात्मनां च प्रशंसा –
- विदेहराज्ञ: जनकस्य सम्वाद: –
- युधिष्ठिरेण स्वपक्षमहत्त्वप्रतिपादनम् –
- देवस्थानमहर्षे: उपदेश: –

## युधिष्ठिरेण भीमवचनस्य विरोधः –

प्रागेव भीमः युधिष्ठिरं प्रति सुखदुःखादिस्वरूपभूतं सर्वं प्रतिपादयामास। एतच्छ्रुत्वा युधिष्ठिरः भीमं प्रत्यवाच असन्तोष-प्रमाद-मद-राग–अशान्ति-बल-मोहादिभिः पापैः आविष्टः सन् त्वमभिकाङ्क्ष्यंसि। तथा सुखदुःखात् विनिर्मुक्तः भूत्वा प्रशान्तचेतसा सुसुखी भवितुं युधिष्ठिरः प्राहः। यः महीपतिः सम्पूर्णां भूमिं शास्ति तस्याप्युदरमेकमेव भवति । न कश्चिदपि नाह्ना पूरयितुं शक्या । यावत् पर्यन्तं समयः वर्तते तावत् पर्यन्तमाशां पूरयितुं न शक्नुयात्। यथा काष्ठं सम्प्राप्य वह्नि इतोपि प्रज्वलितो भवति तथैव अल्पाहारतया उत्थितमुदरं शमय। ये मानवाः ऐश्वर्यं प्रशंसन्ति ते परमपदं न यास्यन्ति परन्तु ये तपस्विनः तपःकृत्वा स्वजीवनं यापयन्ति ते अवश्यं परमपदं यास्यन्ति। राष्ट्रस्य धर्माधर्मौ योगक्षेमौ मुच्यस्व, एतत् त्यक्त्वा सन्यासधर्मं स्वीकुरु।

एकस्योदरस्य भरणार्थं व्याघ्रः बहुविधसं कृत्वा जीवति परन्तु बहवः पशवः अवशिष्टं भोजनं खादित्वा जीवन्ति। राजा तथैव एकस्योदरस्य कृते सर्वं संस्थापयति परन्तु धूर्त्ता तस्य सौविध्यं प्राप्नुवन्ति।

**बोधप्रश्नाः —**

१. कस्य वचनेन युधिष्ठिरः कोपितोऽभवत्?

२. कः उदरभरणार्थं बहून् हन्ति?

## मुनिवृत्तीनां ज्ञानिनां महात्मनां च प्रशंसा –

मुनयः सर्वे सर्वं त्यक्त्वा संन्यासं प्रति गत्वा तुष्यन्ति परन्तु राजानः विषयभोगं कृत्वा कदाचिदपि न तुष्यन्ति। वृक्षस्य फलपुष्पं खादित्वा ये ऋषयः जीवन्ति तथा शीतलजलं पीत्वा अरण्ये तिष्ठन्ति ते एव परमपदं प्राप्नुवन्ति। संसारे सुवर्णं तथा प्रस्थरं ये जनाः समं चिन्तयन्ति तेषां महात्मनां जीवनं धन्यं न तु राज्ञाम्। द्वौ पन्थानौ अस्मिन् लोके  पितृयानदेवयानाख्यौ वर्तेते। यः सकामकर्मणि संलग्नाः जनाः पितृयानेन तथा मोक्षार्थी देवयानेन यान्ति। तपसा ब्रह्मचर्येण स्वाध्यायेन च पाविताः जनाः शीघ्रमेव संसारं त्यक्त्वा मुक्तिमार्गं प्रति यान्ति। संसारे भोग्यविषयरेव बन्धनस्य कारणमेतदेव आमिषं कर्म वर्तते। द्वन्दादिरहितः तत्त्वदर्शी जनकः पुरा यत् कथयामास तच्छ्रुणु – सम्पूर्णैश्वर्यस्य स्वामी अहं परन्तु मिथिलायाः दहने मम न किञ्चित् दह्यति। पर्वतस्योपरि

अरुह्य यथा कश्चित् अध: जनान् द्रष्टु शक्नोति तथैव ज्ञानी पुरुष: प्रासादमारुह्य मूढ़ानां सुखदु:खं दृष्ट्वा कदाचिदपि न शोचति। अज्ञातविषयाणां द्रष्टा य: भवति कर्त्तव्याकर्त्तव्यस्य निश्चयं य: कर्तुं शक्नोति स: पुरुष: बुद्धिमान् इति उच्यते। ते एव स्थिरचित्तप्रसूतानां वैद्यानां भावितात्मनां वाचं श्रोतुं ज्ञातुं च शक्नुवन्ति। यदा पृथक् पृथक् दृश्यमाना: आकाशादय: एकस्मिन् एव कश्चित् अनुपश्यति तदानीं ब्रह्मसाक्षात्कार: भवति इति ज्ञायते। तत्त्वज्ञपुरुष: केवलं रहस्यं ज्ञातुं शक्नोति। यतोहि ज्ञानमेव सर्वेषां मूलत्वेन प्रतिष्ठितं वर्तते।

**बोधप्रश्न: –**

१. मिथिलाया: राजा क: ?

२. समदर्शी क: भवति ?

## विदेहराज्ञ: जनकस्य सम्वाद: –

युधिष्ठिरं प्रति अर्जुन: विदेहराज्ञ: जनकस्य पत्न्या सह कथोपकथनं सम्वादरूपेण जना: कथयन्ति। राजा जनक: यदा राज्यमुत्सृज्य भैक्षार्थं सङ्कल्पं चक्रे तदानीं तस्य महिषी दु:खिता पत्नी तं यथा प्रत्यभाषत तत्सर्वं विस्तारेण अर्जुन: युधिष्ठिरस्य समीपे प्राह:। धनधान्यमपत्यं मित्राणि विविधानि रत्नानि त्यक्त्वा अकिञ्चन: बभूव। भैक्ष्यवृत्तिमकिंचनं तं पतिं दृष्ट्वा प्रिया मनस्विनी प्रिया क्रुद्धा भार्या समागम्य प्रबोधयामास। राज्यमुत्सृज्य किमर्थं कापालीं वृत्तिमास्थाय जीवनं निर्वहति? देवर्षिपितरस्तथा अतिथय: यवै: सन्तुष्टा: न भविष्यन्ति। भवत: परिश्रम: निष्फलमेव। त्रैविद्यवृद्धानां ब्राह्मणानां भर्ता भूत्वा किमर्थं एवं वाञ्छतीति पप्रच्छ। श्रियं प्रदीप्तां च हित्वा सम्प्रति किमर्थं वनेचर इव भाति। एतेन भवत: माता पुत्रहीना तथा भार्या च विधवा इव भाति। अशीतिधर्मकामा: सर्वेऽपि क्षत्रिया: ये त्वां समुपासते ते सम्प्रति कृपणा: इव भान्ति। एतेषां जनानामाशां विफलां कृत्वा कस्मिन् लोके भवान् स्थास्यति? धर्मपत्नीं परित्यज्य य: वने विचरति स: अत्यन्त पापी भवति।

दिव्यसुगन्धालङ्कारान् त्यक्त्वा क्रियारहितः सन् किमर्थं परिव्रजति? हस्तिनमपि वने कीटाः खादन्ति यदि सः निस्तेज भूत्वा तिष्ठति तर्हि क्रियाहीनस्य का गतिः?

यदि इमां कुण्डिकां त्रिदण्डं वस्त्रादि हरणं कृत्वा कः स्वीकरोति तर्हि किं भवान् करिष्यति? अतः अनुग्रहं कृत्वा प्रासादं शयनं यानं वासांस्याभरणानि च संस्थाप्य पृथिवीं प्रशाधि। योऽत्यन्तं परिगृह्णीयात् यश्च सदैव दद्यात्; उभयोः मध्ये कः भेदः? याचमानेषु दानमग्नौ आहुतिवत् निरर्थकं भवति। तत् दानं च निष्फलं भवति। अग्नि यथा दग्ध्वा उपशाम्यति तथैव ब्राह्मणः याचमानः संलब्ध्वा शान्तो भवति। सतां च अन्नं साधूनां कृते लोके वर्तते यदि दाता स्वयमेव दुर्लभो भवति तर्हि तेषां ब्राह्मणानां का स्थितिर्भवति। गृहस्थाश्रमः सर्वेषां प्राणिनां अन्नदः प्राणदश्च भवति। सर्वेषां द्रव्याणां त्यागं कृत्वा सुखं परित्यज्य मौण्ड्यमानः सन् भिक्षुकः सन्न्यासी न भवितुमर्हति। मूढ़ाः एव बहुविधैः पाशैः निवृत्ताः सन्तः परिव्रजन्ति न पण्डिताः। ये च त्रिविद्यां वार्तां पुत्रपौत्रादीन् त्यक्त्वा मौण्ड्याः भवन्ति ते अवश्यं मूढ़ाः भवन्ति।

यदि सन्न्यासी भूत्वाऽपि विषयेषु मनसः निवृत्तिर्नजायते तर्हि अवश्यं तत् निष्फलतां याति । येन सर्वकर्माणि यथोचितानि कृतानि तेन सम धर्मात्मा नास्ति संसारे। अर्जुनः एतादृशं प्रसङ्गं कथयित्वा युधिष्ठिरं स्वक्लेशं परित्यज्य राज्यशासनं कर्तुं प्रचोदयामास। दानधर्मकर्मणि प्रवृत्ताः सन्तः प्रजापालनरूपं कर्त्तव्यं पालने अभिलषितलोकं प्रति अवश्यं व्रजेत्।

**बोधप्रश्नाः –**

१. विदेहस्य राजा कः ?

२. कया जनकः प्रचोदितः?

३. बहुविधैः पाशैः के निवृत्ताः भूत्वा परिव्रजन्ति?

## युधिष्ठिरेण स्वपक्षमहत्त्वप्रतिपादनम् –

अर्जुनस्य ज्ञानयुक्तं तथा राज्ञ: धर्मप्रतिपादकत्त्वं वचांसि श्रुत्वा युधिष्ठिर: तं स्वपक्षस्य महत्त्वप्रतिपादयितुं प्रयतते। अत: युधिष्ठिर: अर्जुनं प्रत्यभाषत लौकिकधर्मशास्त्रं तथा ब्रह्मप्रतिपादकं वेदादिशास्त्रमुभयमहं वेद्मि। वेदेषु कर्मणामनुष्ठानं तथा कर्मणां त्याग: उभय: वर्णित:। यदि धर्मं यथार्थदृष्ट्वा पश्यति तर्हि एतादृशानि वाक्यानि कदाचिदपि न वक्तुं शक्नुयात्। भ्रातृसौहृदमास्थाय यदुक्तं वचनं तदपि न्याययुक्तं तथा युक्तिपूर्णं च वर्तते।

तत्त्वज्ञै: पुरुषै: एवं निश्चितं यत् तप: सन्न्यास: तथा ब्रह्मज्ञानं परं परं ज्याय: वर्तते। एषा एव नै:श्रेयसी गतिर्भवति। स्वाध्यायशीला: सर्वेऽपि जना: धार्मिका: भवन्ति। ऋषय: तपस्वीन: सर्वेऽपि सनातनं लोकं यान्ति। साधुपुरुषा: विषयादिषु विरक्ता: सन्त: अज्ञानं त्यक्त्वा प्रकाशमयमार्गे ब्रह्मलोके महीयन्ते। ये च जना: न्यस्ता: सकामकर्मणि ते दक्षिणद्वारेण चन्द्रलोके पितृलोके च तिष्ठन्ति। मोक्षिण: यत् प्रपश्यन्ति तत् द्रष्टुं कठिनमेव। यथा कदलीस्कन्धं विपाट्य दर्शनेऽपि सारं न वर्तते तथैव वेदवादानतिक्रम्य शास्त्राण्यारण्यकानि विपाट्य विद्वांस: किमपि न ददृशिरे। पञ्चभौतिकशरीरे एकान्तव्यदासेन संसिक्ता: मूढा: इच्छाद्वषसमायुक्तमात्मानं प्राहु:। अत्मन: सत्ता द्रष्टुं कश्चिदपि न शक्नोति सोऽपि सर्वभूतेषु परिवर्तते। ये च मानवा: अविद्यापूरितसंसारे धनजनं त्यक्त्वा कल्याणमार्गे यान्ति ते एव धर्मज्ञा: भवन्ति। अस्य प्रसङ्गस्य हृदयाङ्गमे महत् सुखं जायते। यथा मूढा: शास्त्रषु सूक्ष्मतत्त्वं द्रष्टुमसमर्था: तथैव साधव: शास्त्रस्य मर्मविषयं ज्ञातुमसमर्था: भवन्ति।

**बोधप्रश्न: —**

१. पितृलोक: केन द्वारेण पतति ?

२. ब्रह्मलोकं प्रति के जना: यान्ति ?

**देवस्थानमहर्षेः उपदेशः –**

वैशम्पायनः जनमेजयं प्रति युधिष्ठिरस्य वचांसि श्रावयामास। ततः अर्जुनः वचनं समर्थयन् महर्षिः देवस्थानः युधिष्ठिरं प्रति प्रबोधयामास। कृत्स्नां पृथ्वीं जित्वा अकिञ्चनत्त्वं न स्वीकर्त्तव्यं वर्तते। शास्त्रेषु चतुराश्रमाणां वर्णनं प्रविभ्लाश्यते। चतुराश्रमाणां कर्माणि यथोचितरूपेण सर्वेषां कृते वर्तते। अतः राज्ञः कर्त्तव्यानुसारं गृहस्थाश्रमे प्रविश्य सकलां धरां प्रशाधि। सदक्षिणं महतः यज्ञान् आनुष्ठानं कृत्वा प्रजावत्सलः भवेत्। अत्यन्तकष्टेन धनादिसञ्चयो भवति। योग्यायोग्यत्त्वं परित्यज्य मानवः धनं ददाति। दानकर्त्ता सम्परीक्षणं कृत्वा धनं दद्यात्। देवराजः इन्द्रः यज्ञदानादिकर्म कृत्वा सर्वान् देवान् अतिक्रम्य स्वर्गलोकस्य राजपदत्त्वं प्राप्तवान्। महातेजस्वी कृत्तिवासा महात्मा महादेवः सर्वमेधयज्ञं कृत्वा शरीरमपि अग्नौ आहुतिं दत्वा देवानामपि देवः बभूव।

अविक्षितस्य पुत्रः मरुत् समृद्धियुक्तयज्ञं कृत्वा तस्य यज्ञस्य प्रभावेण साक्षात् लक्ष्मी मूर्त्तिमयीं भूत्वा सन्निविष्टा आसीत्। राजा हरिश्चन्द्रः यज्ञानुष्ठानं कृत्वा पुण्यभागी बभूव। मनुष्यः सन् अपि इन्द्रादधिकैश्वर्यवान् आसीत्।

**बोधप्रश्नाः –**

१. कः देवानामधिपतिः ?

२. कः आश्रमाणां विषये प्रबोधयामास ?

**सारांशः –**

भीमेन प्रतिपादितस्य क्षत्रियकर्त्तव्यस्य विरोधं कृत्वा युधिष्ठिरः स्वपक्षसिद्धान्तं प्रतिपादयामास। सांसारिकविषयवासनां त्यक्त्वा मुनिवृत्तीनां मार्गं स्वीकर्त्तुं युधिष्ठिरः अब्रवीत्। ज्ञानिनां महात्मनां प्रशंसां कृत्वा युधिष्ठिरः कर्त्तव्यनिष्ठसन्यासमार्गम् अनुसर्तव्यमिति भीमं प्रति आहः। मिथिलायाः राजा जनकस्य अपि दृष्टान्तं

दत्वा अर्जुनः भ्रातरं प्रबोधयामास। सन्न्यासग्रहणे यथा जनकस्य पत्नी वारणं चक्रे तथैव युधिष्ठिरं वारयितुं प्रयासः आचरितः। ततः युधिष्ठिरः स्वस्य विचारं प्रस्पादयितुं विविधानि वचनानि प्राहः। देवस्थानमहर्षिणा युधिष्ठिरं प्रति यज्ञानुष्ठानाय प्रेरणा प्रचकास्ति। अस्मिन् अध्याये सन्न्यासधर्मस्य प्रशंसा तथा सर्वैः गृहस्थाश्रमस्य श्रेष्ठत्वं च प्रतिपादितं वर्तते।

## आदर्शप्रश्ना: —

### लघूत्तरीयप्रश्ना: —

१. महात्मनां ज्ञानिनां च कार्याणि लिखत।

२. गृहस्थजनानां कर्त्तव्यानि लिखत।

३. आत्मन: सत्तां युधिष्ठिरस्य मतानुसारं लिखत।

### विश्लेषणात्मकप्रश्ना: —

१. देवस्थानमहर्षिणा प्रदत्तानि यज्ञसम्बन्धीनि उदाहरणानि लिखत।

२. युधिष्ठिरेण भीमवचनस्य विरोधं प्रतिपादयत।

३. जनकस्य राजधर्मकर्त्तव्यानि लिखत।

### निबन्धात्मकप्रश्ना: —

१. देवस्थानमहर्षे: उपदेशस्य समीक्षां कृत्वा विशदयत।

२. महात्मनां मुनीनां च मार्गं युधिष्ठिरदिशा प्रतिपादयत।

### एकाङ्कप्रश्ना: —

१. वैशम्पायन: कं कथां श्रावयामास ?

२. गृहस्थाश्रमविषये क: युधिष्ठिरं श्रावयामास ?

३. मिथिलाया: नरेश: क:  ?

४. ज्ञानिनां महात्मनां परमं सुखं किम् ?

५. महादेव: कं यज्ञं चकार ?

६. देवानां राजा क: ?

७. का जनकं प्रति अबोधयत् ?

८. कति आश्रमा: भवन्ति ?

९. ब्रह्मलोके प्रति के यान्ति ?

१०. ज्ञानशास्त्ररूपेण क: अभिधीयते ?

११. कः उदराय बहून् नाशयति ?

१२. कः अत्यन्तं दुर्बोधः ?

**उत्तराणि —**

१. जनमेजयं २. देवस्थानं ३. जनकः ४. सन्तोषः ५. सर्वमेधः ६. इन्द्रः

७. जनकस्य पत्नी ८. चत्वारः ९. साधवः १०. वेदः ११. व्याघ्रः १२. धर्मः

# षष्ठोऽध्यायः

## प्रस्तावना –

शान्तिपर्वान्तर्गते राजधर्मानुशासनपर्वणि प्रतिपाद्येऽस्मिन् अध्याये शोकसंविग्नमनसः युधिष्ठिरस्य देवस्थानेन सह कथोपकथनं तथा देवस्थानेन युधिष्ठिरं प्रति उत्तमधर्मस्य ज्ञापनादिकं प्रतिपादितम्। यज्ञकरणार्थं च देवस्थानः प्रतिपादयामास। एतयोः द्वयोः कथोपकथनसमये अर्जुनेन पुनः युधिष्ठिरं प्रति प्रबोधनादिकं प्रतिपाद्यते। ततः व्यासेन शङ्खलिखितयोः कथां श्रावयित्वा युधिष्ठिराय राजधर्मपालननिमित्तमुपदेशः समुपवर्णितः। राज्ञः सुद्युम्नस्य दण्डधर्मपालनस्य महत्त्वं कथयामास।

## उद्देश्यानि —

अध्यायेऽस्मिन् एतान् विन्दून् पठिष्यन्ति।

- इन्द्रबृहस्पतिसम्वादः
- धर्मस्य महत्ता प्रतिपादनम्
- वेदव्यासेन गृहस्थाधर्मस्य प्रबोधनम्
- क्षत्रियधर्मस्य प्रशंसा
- शङ्खलिखितयोः चरितम्
- राजधर्मानुशासनम्

## इन्द्रबृहस्पतिसम्वादः –

देवस्थानमुनिः युधिष्ठिरस्य क्लीवतां दूरीकर्तुं पुरातनमितिहासे इन्द्र-बृहस्पतेः सम्वादः प्रबोधयामास। कदाचित् इन्द्रस्य प्रश्ने सहर्षः देवगुरुः बृहस्पतिः सन्तोषस्य परमं सुखत्वं प्राह। स्वर्गलोकादपि सन्तोषः सर्वश्रेष्ठः। सन्तोषेनैव परमसुखं लभते तथा सन्तोषेन कश्चिदपि सुसम्यक्परितिष्ठति। यथा कूर्मः स्वाङ्गानि सर्वशः संहरते तथैव यस्य कृत्स्ना वासना स्वात्मनि लीनो भवति ततः आत्मज्योतिः अत्मैव प्रसीदतीति नास्ति लेशोऽपि सन्देहस्यावकाशः। यदा साधकः पुरुषः कामद्वेषौ जयति, कुत्रापि न विभेति, भूतान्यपि न विभ्यति तदा सः पुरुषः आत्मानं प्रपश्यति। असौ मानवः यदा कर्मणा मनसा वाचा च कस्मैचिदपि न क्रुध्यति दुष्यति च तदा तस्य ब्रह्मज्ञानं सम्पद्यते। भूतानि यदा स्व स्व धर्मे अविरताः भवन्ति तदा स्वमात्मानं ब्रह्म प्रपश्यन्ति।

पञ्चतत्त्वाञ्चितेऽस्मिन् प्रपञ्चे केचन शमं प्रशंसन्ति केचन व्यायामादिकं प्रशंसन्ति , नैके उभयं प्रशंसन्ति। तथापरे अन्ये नैकमपि वदन्ति। यज्ञं केचन प्रशंसन्ति केचन संन्यासं दानं प्रतिग्रहं च कृत्वा हृष्यन्ति। अन्ये हत्वा भित्त्वा छित्त्वा च राज्यस्य परिपालनं प्रशंसन्ति तथा केचन एकान्तरूपेण वने निवसन्ति।

**बोधप्रश्नाः –**

१. बृहस्पतिः कं राजधर्मं प्रबोधयामास ?

२. के के आत्मानं प्रपश्यन्ति ?

## धर्मस्य महत्ता प्रतिपादनम् —

सर्वं रहस्यं समालोक्य बुधजनानां निश्चयः सारभूतः सिद्धान्तो भवति धर्मः। ततः साधुसम्मत्तधर्मस्य प्रतिपादने परमपदं लभते। विनाद्रोहेणैव भूतानां यः धर्मः परिकल्पितः महर्षिभिः सः धर्मः साधुसम्मत्तो वर्तते। अद्रोहसत्यवचनधृतिक्षमामार्दवस्वदारेषु प्रजनादिकं उत्तमधर्मेण युक्तं धनमिति स्वायम्भुवमनुः अब्रवीत्। तस्मादेव

हे कौन्तेय! प्रयत्नेन कर्तव्यं परिपालय। यः राजा राजनीतिज्ञः जितेन्द्रियः धर्मशास्त्रादितात्पर्यं विदित्वा राज्यं परिपालयति, प्रियाप्रियत्वे समदर्शी भवति यज्ञस्य अवशिष्टमन्नं भुङ्क्ते, दुष्टान् दण्डं साधूनां प्रग्रहे रतो भवति सः स्वयं धर्मवत्मनि गत्वा प्रजाः अपि चालयति। अन्तिमसमये पुत्राय राज्यभारं दत्वा वनं प्रति गच्छति। राजधर्मविनिश्चितः एतादृशः राजा उभयलोके शुभफलं प्राप्नोति। गोब्राह्मणानां हिताय अस्त्र-शस्त्रादिकं धृत्वा युद्धे प्रजाः युद्धेन उत्तमगतिं सम्प्रप्ता। एतादृशः रुद्रवसुसाध्यगणराजर्षयः सावधानेन तिष्ठेयुः

बोधप्रश्नाः

१. राजा कीदृशः भवेत् ?

२. के च सावधानेन तुष्ठेयुः ?

देवस्थानमहर्षेः कथनादनन्तरं पुनः विषण्णमनसं ज्येष्ठभ्रातरं प्रति पार्थः अब्रवीत् हे नरश्रेष्ठ! क्षत्रियधर्मं पालयित्वा अनुत्तमं राज्यं जित्वाऽपि भृशं किमर्थं तप्यते? क्षत्रियाणां संग्रामे निधनं श्रेष्ठं भवति यत् बहुभिः यज्ञैः अपि साधयितुं न शक्यते। ब्राह्मणानां तपस्त्यागः प्रेत्यधर्मविधिः भवति परन्तु क्षत्रियाणां संग्रामे निधनं पारलौकिको धर्मो भवति। काले शस्त्रेण संयुगे युद्धस्थले वधश्च क्षत्रियाणां महान् धर्मो भवति। अयं क्षत्रियधर्मः ब्रह्मणि संस्थितो वर्तते यदि ब्राह्मणोऽपि स्वधर्मं परित्यक्त्वा क्षत्रधर्मे तिष्ठति तथापि तस्य जीवनं लोके धन्यं भवति। क्षत्रियाणां त्यागयाच्ञापरस्वोपजीवनं न विधीयते। क्षत्रधर्मस्य विषये मनीषी निपुणो सर्वात्मा राजा युधिष्ठिरः सम्यक् जानाति। परन्तु तथापि विषण्णमनसा तिष्ठति। वज्रसंहतं क्षत्रियस्य हृदये एतादृशं दुःखं न शोभते। अतः अरीन् जित्वा क्षत्रधर्मं संप्राप्य अकण्टकं राज्यं परिपाल्य स्वकर्मणि प्रवृत्तः सन् यागयज्ञादिकं कर्तव्यम्। देवराजः इन्द्रः ब्राह्मणपुत्रः सन् अपि क्षत्रियकर्मणा नवतीर्नवज्ञातीनां पापवृत्तीनां हननमकार्षीत्। तत् कार्यं कर्म च जगति प्रशंसनीयमासीत्। तत् धर्मेण देवानामतिदुर्लभं इन्द्रत्वमापेदे। तद्वत् राज्ये दानधर्मादिकं कृत्वा यज्ञैः दक्षिणैः

यजस्व। ते सर्वे दुर्योधनादयः शस्त्रपूतां परां गतिं जग्मुः। त्वमेवगते मा शोचिथाः। यच्च भवितव्यं तदेव अवश्यं पूर्णतां याति, तदतिवर्तितुं न कोऽपि शक्नोति।

बोधप्रश्नाः –

१. कः स्वज्ञानीन् जघान?

२. क्षत्रियाणां पारलौकिकधर्मः कः ?

३. युधिष्ठिरं कः प्रबोधयामास?

## वेदव्यासेन गृहस्थाधर्मस्य प्रबोधनम् –

अर्जुनः स्वभ्रातरं युधिष्ठिरं प्रति क्षत्रियधर्मस्यपरिपालनाय बहुविधं प्रबोधयामास। परन्तु युधिष्ठिरः तत् सर्वं श्रुत्वा न किमपि उवाच। ततः महर्षिः वेदव्यासः तं युधिष्ठिरं प्रति अश्रमाणां वर्णनं कृत्वा गृहस्थाश्रमस्य महत्त्वं तथा राज्ञां कर्तव्यं कथयामास। सर्वेषु शास्त्रषु गृहस्थाश्रमः श्रेष्ठाश्रमरूपेण समुपवर्ण्यते। तत्रैव सर्वधर्माणां साधनं भवति। स्वधर्मे निधनः श्रेयः इति यथा गीतायां भगवान् श्रीकृष्णः अब्रवीत् तथैव क्षत्रियधर्मे तथा गृहस्थाश्रमे राजा प्रवृतो भवेत्। गृहस्थश्रमे सर्वे देवाः पितरः ऋषयश्च जीवन्ति। अतः गृहस्थ्यमुत्सृज्य अरण्यं तव कृते न विधीयते। सर्वेषु आश्रमेषु गृहस्थाश्रमः श्रेष्ठो भवति सर्वाणि भूतानि गृहस्थाश्रममाश्रित्य तिष्ठन्ति तथा स्वकर्मणा स्वलोकं प्रति यान्ति। एषः गृहस्थाश्रमः सर्वेषु आश्रमेषु एतदर्थं श्रेष्ठतां याति यतोहि अयमाश्रमः दुराचरः तथा दुर्बलेन्द्रियैः दुश्चरः भवति। गृहस्थैः एव सर्वाणि भूतानि धार्यन्ते। सर्वं वेदादिशास्त्रं समधीत्य तपः आचरित्वा पितृपैतामहं राज्यमुद्वोढुं कश्चित् अर्हसि।

बोधप्रश्ना: –

१. क: युधिष्ठिरं प्रति गृहस्थाश्रमविषये प्रबोधयति ?

२. क: आश्रम: श्रेष्ठ: ?

## क्षत्रियधर्मस्य वैशिष्ट्यम्

यज्ञतपदानदानप्रतिग्रणेन्द्रियसंयमध्यानेकान्तवाससन्तोषादय: ब्राह्मणानां परमधर्मो भवति । अध्ययनाध्यापनयज्ञाद्यनुष्ठानप्रभृतय: मुक्तये परमसाधका: भवन्ति। परन्तु क्षत्रियाणां धर्म: भिन्नरीत्य वर्तते। यज्ञानुष्ठनाध्ययनसमुत्साहदण्डधारणकठोरताप्रजापालनादिकं क्षत्रियाणां परमो धर्मो वर्तते। बाल्यकाले वेदाद्यध्ययनं कृत्वा तप: सुचाररीत्या कृत्वा भूरि द्रविणोत्पार्जनं कृत्वा च पात्रेषु प्रतिदानमपि क्षत्रियाणां महान् धर्मो भवति। एतत् सर्वं शास्त्रेषु सम्यक् रीत्या प्रतिपाद्यते। य: क्षत्रिय: एतत् समाचरति स एव परमपदं प्राप्नोति। क्षत्रिय: इमं लोकं परलोकं च सुकृतानि कर्माणि कृत्वा साधयन्तीति न संशयो वर्तते। क्षत्रिये नित्यं बलं तथा बले दण्डधारणात्मकं मुख्यकर्म भवति। बलाश्रित: दण्डो भवति । अत: क्षत्रियेषु बल: समाहित: स्यात्। एतत् सर्वं क्षत्रियाणां सिद्ध्यर्थं प्रतिपाद्यते विविधेषु शास्त्रषु। बृहस्पति: अपि कदाचित् इमां गाथामभाषत। यथा भूमिरेतौ मूषकान् सर्प: निगिरति तथैव क्षत्रधर्मपरिपालने असमर्थं राजानं तथा ब्राह्मणकर्मणि असमर्थं ब्राह्मणं पृथ्वी शीघ्रं निगिरति।

बोधप्रश्न: –

१. कं धरा निगिरति ?

२. क्षत्रियाणं परमधर्म: क: ?

३. ब्राह्मणानां परमधर्म: क: ?

## सुद्युम्नचरितम् –

प्रचेतस: पुत्र दक्ष यथा सिद्धिमपाप्नोत् तथैव राजर्षि: सुद्युम्न:अपि दण्डधारणात् परमां सिद्धिं प्राप्तवान्। तत: युधिष्ठिर: व्यासं प्रति पप्रच्छ हे भगवन्! पृथिवीपतिसुद्युम्न: केन कर्मणा परमसिद्धिमवाप । व्यासस्य मुखपद्मात् एतत् श्रोतुकाम: युधिष्ठिर: दण्डधारणात् कथं परमां सिद्धिं प्राप्तवानसौ सुद्युम्नरिति पप्रच्छ। तत: व्यासदेव: धर्मराजं प्रति प्राचीनेतिहासस्योदाहरणरूपेण सुद्युम्नचरितं श्रावयामास ।

कदाचित् संयमव्रतौ शङ्खलिखिताख्यौ द्वौ भ्रातरौ आस्ताताम्। बाहुदानद्या: समीपे रमणीयफलपुष्पवृक्षैरुपेतौ पृथक्पृथक् आवासौ बभूवतु:। तत: लिखित: स्वेच्छया अग्रजस्य शङ्खस्य आश्रमं प्रति अगमत्। यदृच्छयापि शङ्ख: आश्रमात् निष्क्रान्तोऽभवत्। तत: लिखित: सम्यक्परिणतान्युतानि फलानि आश्रममभिगम्य शातयामास। तान्युपादय स: द्विज: विस्रब्धो भूत्वा भक्षयामास। तदानीमेव शङ्ख: आश्रमं प्रति अगमत्। तं लिखितं स्वभ्रातरं भक्षयन्तं दृष्ट्वा शङ्ख: अब्रवीत् हे द्विज! कुत: एतानि सर्वाणि फलानि अवाप्तानि? केन हेतुना त्वं खादसि? लिखित: अग्रजस्य समीपं गत्वा प्रणामपूर्वकमभिवाद्य च प्रहसन्निव इत: एव एतानि सर्वाणि फलानि गृहीतानीति उवाच। तत: कोपेन महर्षि: शङ्ख: तं भ्रातरं प्रति अब्रवीत्। ममाज्ञां विना त्वया कृतमिदं फलान्याददता स्वयं। अत: स्वार्जितस्य पापस्य परिमार्जनार्थं राजानमासाद्य स्वकर्म प्रथयस्व । अदत्तग्रहणरूपी पापस्य निराकर्तुं गच्छ। तत: लिखित: राजानं प्रति गत्वा अदत्तदानविषये विदित्वा शीघ्रं चोरस्य नाम धारय इति अब्रवीत्। तत: लिखित: ज्येष्ठस्य शङ्खस्य वचनं श्रुत्वा संशितव्रत: महाबाहुं सुद्युम्नं प्रति जगाम। नरेश्वर: सुद्युम्न: स्वकार्याणि त्यक्त्वा स्वामात्यै सह तं मुनिं प्रति गत्वा अगमत्। किम् आगमनस्य कारणम् आचक्ष्वेति राजा तं मुनिसत्तमं अप्राक्षीत्। सुद्युम्नस्य मुखपद्मात् एतादृशं वचनं श्रुत्वा महर्षि: तमब्रवीत् प्रतिश्रौषि करिष्येति सर्वादौ उच्यताम्। अग्रजस्यानुमतिं विना तस्याश्रमस्य अनिसृष्टानि फलानि भक्षितानि ततो मां शाधि। तत: सुद्युम्न: तं मुनिं प्रत्युवाच हे ब्राह्मणर्षभ! राज्ञ: दण्डप्रयोगेणैव पापस्य शान्तिर्भवति। तथापि राज्ञ: क्षमाद्वारा च पापशान्तिर्भवति। अहं भवते क्षमां तथा स्वाश्रमं प्रति गन्तुमाज्ञां च दत्तवान्। यदि द्वितीया काचिदभिलाषा वर्तते तत् ब्रुहि अवश्यमहं करिष्यामि। महात्मना राज्ञा छन्द्यमानोऽपि महर्षि: लिखित: नान्यं वरं वरयामास। दण्डमतिरिच्य नकिमपि वरं स: प्रार्थयामास। सुद्यम्न: महात्मन: लिखितस्य करौ प्रच्छेदयामास। तथा ब्रह्मर्षि: तस्मात् स्थानात् जगाम। तत: धृतदण्ड: स: लिखित: स्वभ्रातरं प्रति गत्वा क्षमामाचरितवान्। अनुजस्य वचनं श्रुत्वा ब्रह्मर्षि: शङ्ख: तमुवाच हे

धर्मज्ञ! त्वं मम किमपि अनिष्टं न कृतवान्। धर्मस्योलङ्घनकारणात् प्रायश्चितकरणाय गन्तुमनुमतिः दत्ता। ततः बहुदातीरे देवान्पितृनृषींश्चैव तर्पयस्व। तस्य वचनं श्रुत्वा लिखितः तदानीं पुण्यामुदकार्थं अवगाह्यपगां प्रचक्रमे। ततः लिखितस्य करौ जनजसंनिभौ प्रादुरास्तां। तं दृष्ट्वा विस्मितो भूत्वा तौ करौ दर्शयामास। तपसा इदं सर्वं कृतमिति लिखितं प्रति उवाच। यदि भवति एतादृशं तपः वर्तते किमर्थं पूर्वमेव पूतः न कृतः यदर्थमहं राजानं प्रति गतवान्। शङ्खः आत्मनं लिखितस्य दण्डधरः नास्तीति असूचयत् तथा द्वयोः पवित्रता प्राप्त्यर्थं एतादृशं कार्यमभवदिति उवाच।

एवंरूपेण यत् किमपि व्यासदेवः युधिष्ठिरस्य समीपे कथयामास तत् सर्वं दण्डकर्मप्रभावस्य वर्णनं येन प्रकारेण राजा सुद्युम्नः अस्मिन् लोके परमां सिद्धिं प्राप्तवान्। प्रजानां पालनं राज्ञः परमकर्तव्यं वर्तते। शोके मनः न संस्थाप्य प्रजानां पालनं कर्तुं व्यासदेवः युधिष्ठिरं प्रति प्रबोधयामास। दण्डः एव क्षत्रियाणां परमो धर्मः न मुण्डनं कृत्वा वनगमनं वर्तते।

बोधप्रश्नाः –

१. कः सुद्यम्नविषये कथयामास?

२. कौ द्वौ भ्रातरौ ?

३. कस्य करौ राजा सुद्युम्नः प्रच्छेदयामास?

## राजधर्मानुशासनम् –

शोकसंविग्नमनसा युधिष्ठिरः अशेषग्लानिं हृदि संस्थाप्य राज्यं त्यक्त्वा वानप्रस्थाश्रमं प्रति गन्तुं निश्चयं चकार। सर्वैः बहुबोधितेऽपि मनसि यदा ग्लानिः न जगाम ततः व्यासदेवः अपि स्वमुखनिसृणवचोभिः प्रबोधयामास। परन्तु तथापि युधिष्ठरस्य मनसि दुःखं परिभूय व्यासदेवः पुनः तं उद्बोधयामास। वैशम्पायनः एतत् सर्वं स्वशिष्याय कथयामास। हे भरतश्रेष्ठ! अरण्ये यदा भवतः भ्रातरः आसन् तदानीं सर्वेषामभिलाषा राज्यशासने आसीत्। अतः नहुषपुत्रः राजा ययातिरिव पृथिवीं प्रशाधि। यदा वने सर्वैः पाण्डवैः

वनवासगतदु:खमनुभूतम्। परन्तु अस्मिन् समये तत् परित्यज्य राजसुखं भोक्तव्यं। गृहस्थाश्रमे सम्पूर्णं धर्मार्थकामादीन् अनुभूय अन्तिमसमये वानप्रस्थाश्रमे स्थातव्यम्। सर्वादौ पितृदेवादीनां ऋणस्य परिशोध: कर्तव्य:। अत: अश्वमेधसर्वमेधादि यज्ञानामनुष्ठानं कुरु। तत: पश्चात् परां गतिं गमिष्यति। अस्मिन् लोके अतुलां कीर्तिं सम्प्राप्तुं भ्रातृभि: सह यजस्व। अत: नृपस्य परमं कर्तव्यं विद्ध यत् अस्मिन् लोके लाभाय वर्तिष्यति। नरेश्वरा: धर्मकुशलान् जनान् स्वकार्ये स्थापयन्ति। परन्तु य: राजा देशकालप्रतीक्षे शास्त्रजां बुद्धिमास्थाय तिष्ठति स एव पापकर्मणि लिप्तो न भवति।

य: राजा षड्भागं करमादाय राष्ट्रं न अभिरक्षति स: पार्थिव: प्रजानां चतुर्भागं पापं प्रतिगृह्णाति। राजधर्म: शास्त्राणामुल्लङ्घनेन पतितो भवति। तथा धर्मशास्त्रादीनामनुकूलतया समनुष्ठाने राजधर्म: नीचतां न याति। कामक्रोधावनादृत्य पिता इव प्रजानां परिपालने तत्पर: राजा इहलोके कीर्तिं प्राप्नोति। महाद्युते कर्मकाले यदि राजा किमपि कर्म कर्तुं विस्मरति तथा प्रमादयति तर्हि स: कार्यस्य अतिक्रमकारी न भवति । बलबुद्धिकौशलै: शत्रव: निग्राह्या: तत: पापै: सह न संदध्यात्। राज्ञा शूरवीरान् तथा साधून् यत्नेन सत्कार: कर्तव्य:। विशेषत: गोरक्षयितारं सम्यक् परिपालयेत्। व्यवहारधर्मकार्ये च बहुदर्शी पुरुषाणां नियुक्ति कर्तव्या भवति। गुणयुक्ते पुरुषे अपि विश्वास: न कर्तव्य:। अरक्षिता दुर्विनीतो मानी स्तब्धोऽभ्यसूयक: राजा लोकेषु अधर्मी तथा दुर्दान्त: इति चोच्यते। यदि राज्ये दैवेनोपहते प्रजा: अरक्ष्यमाणा: सन्त: हीयन्ते तस्करैश्च हन्यन्ते तत् सर्वं पापं राजकिल्बिषं भवति। उत्तममन्त्रणया सह श्रेष्ठनीतिं समाचर्य पौरुषे कर्मणि कृते अधर्मो न भवति। पुरुषार्थे प्रवृत्तं राजानं कदाचिदपि पापं न स्पृशति तथा तेन समारब्धानि कार्याणि सिद्ध्यन्ति ।

बोधप्रश्ना: –

१. राजधर्मं युधिष्ठिरं प्रति क: प्रबोधयति ?

२. कति पुरुषार्था: भवन्ति ?

३. ययाति: कस्य पुत्रो वर्तते ?

## सारांश: –

युधिष्ठिरस्य ग्लाने: दूरीकरणाय सर्वे स्वस्वमभिप्रायं कथयामास। परन्तु न तस्य शोकस्य दु:खं दूरीभवति। तत: अर्जुन: पुन: विविधा: कथा: श्रावयित्वा प्रेरयितुं प्रयासं चक्रे। इन्द्रबृहस्पतिसम्वादद्वारा सन्तोषस्य परमसुखत्वं प्रतिपादितं वर्तते। क्षत्रियधर्मपालनं राज्ञ: परमकर्त्तव्यमिति देवस्थानमुनि: अब्रवीत्। तथा प्रपञ्चे क्षत्रियधर्मस्य महत्त्वं प्रतिपाद्य नृपा: युद्धे परमां गतिं प्राप्नुवन्ति इति प्रबोधयामास। सुद्युम्नस्य चरितमुदाहरणरूपेण प्रतिपादयामास। तत: राजधर्मानुशासनपर्वण: महत्त्वमध्यायेऽस्मिन् दृश्यते। राजधर्मस्य सर्वाणि कर्माणि प्रतिपादितानि सन्ति। शङ्खलिखितो: कथां व्यासदेव: साक्षात् प्रतिपादयामास। अधर्मस्य फलं कीदृशं भवाति तत् शङ्खलिखितयो: चरितस्याध्ययनेन ज्ञातुं शक्यते।

## आदर्शप्रश्नाः —

### लघूत्तरीयप्रश्नाः —

१. गृहस्थस्य कर्त्तव्यादिकं लिखत।

२. राज्ञः कर्त्तव्यानि लिखत।

३. व्यासेन बोधितस्य गृहस्थाश्रमस्य वैशिष्ट्यं प्रतिपादयत।

### विश्लेषणात्मकप्रश्नाः —

१. क्षत्रधर्मस्य वैशिष्ट्यं स्पष्टीकुरुत।

२. राजधर्मानुशासनस्य प्रयोजनानि लिखत।

३. सुद्युम्नस्य राजधर्मं प्रतिपादयत।

### निबन्धात्मकप्रश्नाः —

१. सुद्युम्नचरितस्य समीक्षां कृत्वा स्पष्टीकुरुत।

२. राजधर्मानुशासनं विशदयत।

३. इन्द्रबृहस्पतिसम्वादं स्पष्टीकुरुत।

### एकाङ्कप्रश्नाः —

१. कौ द्वौ भ्रातरौ ?

२. व्यासदेवस्य पितुः नाम किम्?

३. लिखिताय कः शापं ददौ?

४. इन्द्रबृहस्पतिसम्वादस्य वक्ता कः?

५. शङ्खस्य आश्रमे फलं कः अखादीत्?

६. कति पुरुषार्थाः भवन्ति?

७. राजा कररूपेण कियत् भागं स्वीकरोति?

८. राजा प्रजानां कृते कीदृशः स्यात्?

९. केन शास्त्रेण सह राजधर्मस्य सम्बन्धो वर्तते?

१०. ययातिः कस्य पुत्रो वर्तते ?

११. देवस्थानमुनिः कं राजधर्मं बोधितवान् ?

१२ केन प्रवृत्तं राजानं पापं न स्पृशति ?

१३. कः आश्रमः श्रेष्ठः ?

**उत्तराणि —**

१. शङ्खलिखितौ २. पराशरः ३. शङ्खः ४. देवस्थानमुनिः ५. लिखितः ६. चत्वारः

७. षट् ८. पिता ९. धर्मशास्त्रेण १०. नहुषस्य ११. युधिष्ठिरं १२. राजधर्मेण

१३. गृहस्थः

# सप्तमोऽध्याय:

## प्रस्तावना —

शान्तिपर्व महाभारतस्यात्मस्थानीयं पर्व वर्तते। अत्र राजधर्मानुशासनस्य यथा वर्णनं वर्तते तत् समग्रसाहित्यं प्रत्यवदानं प्रस्तौति। न केवलं भारतीयज्ञानविज्ञानपरम्पराया: अपितु विश्वसाहित्यजगति एतस्य पर्वण: महत्त्वं सर्वजनविदितं वर्तते। अध्यायेऽस्मिन् युधिष्ठिरस्य ग्लाने: भङ्गकरणाय बहुविधानि कर्माणि उपायानि च प्रयुक्तानि तेषां विवरणं प्रदीयते। व्यासमुखेन अद्वितीयस्य राज्ञ: कर्तव्यादिकं पालनाय प्रतिबोधनं वर्तते। अश्ममहर्षे: सम्वादद्वारा जनकस्य शोकनाशनं प्रारब्धस्य प्रवलताया: प्रबोधनस्य वर्णनं दृश्यते। सृञ्जयराज्ञ: वर्णनप्रसङ्गे षोडशनृपाणां वर्णनं विधीयते। श्रीकृष्णस्यापि युधिष्ठिराय अवबोधनप्रसङ्ग: समुपस्थाप्यते। नारदपर्वतयो उपाख्यानस्य वर्णनं वर्तते। यत्र शापग्रस्तौ द्वौ भूमण्डले बभूवतु:। एतेषां समेषां विवरणं प्रस्तुतेऽस्मिन् अध्याये दृश्यते।

## उद्देश्यानि —

अध्यायेऽस्मिन् प्रिय पाठका: सर्वे एतान् सर्वान् विन्दून् वेदिष्यन्ति।

- हयग्रीवचरितम्
- कालस्य प्रभाव:
- सेनजिदुपाख्यानम्
- युधिष्ठिरस्य ग्लानि:

## हयग्रीवचरितम्—

व्यासदेवः युधिष्ठिरं प्रति राज्ञां कर्तव्यपालनादिकमुपदिश्य राजधर्मेषु विचरितुं प्रबोधयामास। ततः कथावृतं श्रावयन् प्रेरणां च ददौ। प्रसङ्गवशात् हयग्रीवस्य चरितं युधिष्ठिरस्य समीपे प्रस्तौति। पुरा हयग्रीवाख्यः कश्चित् राजा आसीत् यः रणभूमौ सर्वान् शत्रून् हत्वा प्रजापालनं चकार। क्लिष्टकर्मणःअपि साधनं तेन सहजतया कृतं वर्तते। शत्रूणां निग्रहे तथा प्रजानां पालने प्रयत्नशीलः एकाग्रचितश्च आसीत्। राजा हयग्रीवः पुरुषार्थाणां साधनं कृत्वा सुयुद्धे शौर्यं दर्शयित्वा देवलोके सुखेन मोदते। सः संसिद्धात्मा कर्मशीलः हयग्रीवः समरे दस्युभिः शस्त्रैश्छिन्नो भूत्वा देवलोके देवैः सह मोदते। सः तपस्वी पुरुषरूपी यज्ञस्य अग्नौ शत्रून् आहूतिं हुत्वा पापरहितः सन् यज्ञस्यान्तिमे अवभृतस्नानं समाप्य देवलोके तिष्ठति। नीतिबुद्धिकौशलैः सः महात्मा राज्यशासनं कृत्वा सम्पूर्णलोके कीर्तिं प्रसार्य देवलोके राजते। दैवीं सिद्धिं मानुषीं दण्डनीतिं चेति बहुविधानां सिद्धीनां प्रयोगं कृत्वा धर्मशीलो राजा हयग्रीवः स्वर्गलोके मोदते। सः हयग्रीवः श्रद्दधानः विद्वांत्स्यागी कृतज्ञश्च मानुषं कर्म कृत्वा मेधाविनां विदुषां तनुत्यजां लोकमाक्रम्य स्वर्गलोके विराजते। सम्पूर्णवेदादिशास्त्राणामध्ययनं कृत्वा उत्तमरीत्या राज्यं पालयित्वा च यथायोग्यधार्मिकादिकार्ये समयं यापयित्वा देवलोकं जगाम। ब्राह्मणानां कृते प्रचुरं धनं दत्वा दण्डधारणं कृत्वा च राज्यमपालयत्।

**बोधप्रश्नाः –**

१. कस्य राज्ञः महत् चरित्रं व्यासदेवः वक्ति ?

२. हयग्रीवः कैः मारितः ?

## कालस्य प्रभावः —

एतावत् पर्यन्तं कुन्तिपुत्रार्जुनस्य तथा श्रीकृष्णद्वैपायनव्यासदेवस्योक्तिं श्रुत्वा युधिष्ठिरः पुनः परिप्रश्नं पप्रच्छ। राज्यं पृथग्विधाः भोगाः युधिष्ठिरं न प्रीणयन्ति केवलं शोको रुन्धयति। परिदेवयमानां योषितां

वीरहीनानामपुत्राणां विलापं श्रुत्वा युधिष्ठिरः शान्तिं न उपलभे। एतदुत्तरं व्यासकथितस्य पूर्ववचनस्य उत्तरं तेन युधिष्ठिरेण दत्तम्। ततः वेदव्यासः पुनः प्रबोधयामास। कश्चिदपि पुरुषः कर्मणा चिन्तया दानेन च किमपि न प्राप्नोति यावत् पर्यन्तं सुष्ठुसमयः न आयाति। समयः केवलं कालेन विधात्रा च पर्याययोगाद्विहितं सर्वं मनुष्यः लभते। अकाले विद्या शास्त्राध्ययनं बुद्धिश्च सफलतां न याति। मूर्खोऽपि काले कदाचित् सफलकार्यं प्रति याति। अतः समुचितकालेन सर्वैः सर्वं लभ्यते। पुरुषस्य दुःखसमये विज्ञानमन्त्रौषधिशिल्पं चाभूतिकाले फलं न ददाति यदा अभ्युदयस्य समयः आयाति तदानीमेव कालस्य प्रेरणया सिद्ध्यति सर्वम्। काले प्राप्ते कृष्णासिताः च रात्र्यः परिपूर्णविम्बः चन्द्रः भवति। अकाले पर्वतोपरि स्थिताः वृक्षाः अपि पुष्पादिकं धारयितुमसमर्थाः भवन्ति।

काले नागते सति खगपन्नगाः मत्ताः न भवन्ति। मृगद्वीपाः शैलमहाग्रहाश्च काले सर्वं प्रतिष्ठन्ति। अकालतः स्त्रीषु गर्भमपि न आयाति। शिशिरोष्मवर्षाः अपि काले आयान्ति। नाकालतो कश्चिदपि जायते म्रियते च। बालः अपि सर्वादौ काले एव व्याहरते नाकालतो यौवनमभ्युपैति, नाकालतो बीजपुप्तं रोहति। अकाले चन्द्रः समुद्रश्च न हीयते वर्धते वा भानुरपि नाकालतोऽस्तं गिरिमभ्युपैति च।

बोधप्रश्नाः –

१. कालस्य महिमा कः प्रतिपादयामास ?

२. कदा विद्याकार्ये न आयाति ?

## सेनजिदुपाख्यानम् —

महर्षिः कृष्णद्वैपायनवेदव्यासः कालस्य करालं श्रावयित्वा युधिष्ठिरं प्रबोधयामास। कदाचिदपि काले नप्राप्ते किमपि कर्तुं न शक्यते। सर्वे कालस्य कराले वशीभूताः सन्तः जीवन्ति। पुरा सेनजित् नाम्ना कश्चितः नृपः बभूव। तस्य च राज्ञः कथानकं यथारीतिः व्यासदेवः युधिष्ठिरं प्रति कथयामास। तस्य चरितम् उदाहरणरूपेण जनाः प्रस्तुवन्ति। कालेन परिपक्वा हि सर्वे जायन्ते म्रियन्ते च। केचन नराः अन्यान् जनान् घ्नन्ति

तथा समयप्राप्ते सोऽपि केनचित् हन्यते। एतत् केवलं लौकिकी संज्ञा वर्तते। परन्तु न कश्चिदपि केनचित् हन्यते। सर्वे स्वकर्मणि काले प्राप्ते विनाशं प्रति स्वत: यान्ति। भूतानामाविर्भावादीनां कारणं कालरेव। नियतौ सर्वे स्वभाववशत: मृत्युं प्राप्नुवन्ति। धनक्षये स्त्रीपुत्रपितादीनां मृते सति अहो कष्टमिति ध्यायन् शोकं कुर्वन्ति। दु:खेषु दु:खानि वर्धन्ते तथा भयेषु भयान्यपि जायन्ते। अस्मिन् लोके पृथिव्यां यत् किमपि वर्तते तत् सर्वं ममेति ज्ञात्वा पापकर्मणि लिप्ता: सर्वे भवन्ति। परन्तु ज्ञानी यथा मम तथा सर्वेषामिति विचिन्त्य न मुह्यति। प्रत्यहं सहस्राणि शोकस्थानानि तथा शतानि हर्षस्थानानि मूढ़म् आविशन्ति परन्तु पण्डितान् कदापि एतत् न दूषयति। कालेनैव हर्षादि विषया: प्रियाप्रियस्य कारणभूता: भवन्ति। प्रपञ्चेऽस्मिन् सर्वाणि दु:खमयानि इति हेतु: तस्यैवोपलब्धिर्भवति। सुखस्यानन्तरं दु:खं, दु:खस्यानन्तरं सुखं लभ्यते। कुत्रापि न केवलं दु:खं न केवलं सुखं प्राप्यते। यन्निमित्तं शोकस्तापो वा भवेत् तदङ्गानि च सर्वदा त्यजेत्। सुखदु:खं प्रियाप्रियं वा यदा आगच्छति तदा हृदि प्राप्तमुपासीत। ये च जना: मूढ़ास्त्तथा ये बुद्धे: परं गता: ते एव सुखमेधन्ते मध्ये ये तिष्ठन्ति ते क्लेशेन युज्यन्ते।

एतत् सर्वं महाप्राज्ञ: सेनजित् धर्मवित्सुखदु:खवित् अब्रवीत्। परस्य दु:खे य: पुरुष: सुखी भवति स: कदाचिदपि सुखं न प्राप्नोति। दु:खानां हि क्षयो नास्ति ह्येतत् परात्परं पुन: जायते। पर्यायश: सुखदु:खं लाभालाभौ, भवाभवौ च मानवं स्पृशन्ति। एतस्मादेव धीरा: हृष्येत् न कुप्येत्। क्षत्रियाणां रणभूमि: भवति दीक्षाया: पालनं, राष्ट्रे दण्डनीत्या: पालनं यज्ञो भवति। य: धर्मशील:, यज्ञशील: बुद्धिपूर्वकं राष्ट्रे यत्नशीलश्च स: सर्वान्लोँकान्धर्ममूर्त्या ऊर्ध्वं देवलोके मोदते। य: राजा परलोकगमने सर्वा: प्रजा: पौरजानपदामात्याश्च नमस्यन्ति स: राजा राजसत्तमो भवति। एतत् सर्वं दु:खवशात् राजा सेनजित् पुरा कथयामासेति व्यास: प्राह:।

**बोधप्रश्ना: —**

१. कस्य च राज्ञ: कथा व्यासेन उदाहृता ?

२. क: राजा राजसत्तमो भवति ?

३. के जना: सुखमेधन्ते ?

## युधिष्ठिरस्य ग्लानिः –

महाभारतयुद्धे कुरुक्षेत्रे रणप्राङ्गणे बहवः योद्धाः पुत्राः महावीराः सर्वे दिवं गताः। युद्धसमाप्त्यनन्तरं स्त्रीणां विलापः सर्वेषां जनानां रोदनं दृष्ट्वा युधिष्ठिरस्य मनसि राज्यं प्रति क्षीणभावना आगता। ततः सः विषण्णहृदयः सन् शोकाकुलेन स्वजीवनं वानप्रस्थाश्रमे अतिवाहितुमचिन्तयत्। अभिमन्युः द्रौपद्याः पञ्चपुत्राः धृष्टद्युम्नद्रुपदादयः सर्वेऽपि युद्धे दिवं गताः। राज्यकामुकमत्युग्रं स्ववंशोच्छेदकारकं ज्ञातिघातिनमातुरं मां शोको न विमुञ्चतीति युधिष्ठरः व्यासदेवं प्राह। यस्याङ्कें क्रीडमानेन परिवर्तितं राज्यलुब्धेन गाङ्गेयः अपि पाण्डवैः विनिपातितः। नरसिंहस्य पितामहस्य जीर्णं शरीरं दृष्ट्वा युधिष्ठिरस्य मनसि शोको जायते। ततः पितामहस्य भीष्मस्य पराक्रमं स्मृत्वा रुरोद। बहून्यहनि कुरुक्षेत्रे पितामहः भार्गवपर्शुरामेण सह योधयामास। स च पितामहः भीष्मः वाराणस्यां काशिराज्ञः कन्यार्थं सर्वान् पार्थिवान् योद्धुमाह्वयत्। स्वयमेव शिखण्डिनं मृत्युं ज्ञात्वाऽपि बाणैः न पातयामास, यदर्थं अर्जुनेन सः निपातितः। पुनः शोकातुरः सन् आचार्यस्य द्रोणाचार्यस्य वचनं स्मृत्वा रुरोद।

ततः युधिष्ठिरः व्यासं प्रति प्राहः हे भगवन्! द्रोणाचार्यः सुतस्य विषये मम समीपे समागत्य परिपप्रच्छ। मिथोपचारितं कुञ्जरं चान्तरं कृत्वा राज्यलुब्धेन पापेन मिथ्याचारमुवाच। एतादृशं मिथ्यावचनमुक्त्वा राज्यलोभेन गुरुं घातयित्वा कस्मिनपि लोके शान्त्या जीवितुं न शक्नोमीति प्राहः। सर्वेषां योद्धानां मरणे युद्धिष्ठिरः एव कारणभूतः इति चिन्तयन् आत्मानं युधिष्ठिरः दोषी मनुते । युधिष्ठिरः एवं विचिन्त्य भोक्ष्यं पानीयमुपयोक्ष्य प्रियान् प्राणान् शोषयिष्ये इति उवाच।

**बोधप्रश्नाः –**

१. युधिष्ठिरः कं प्रति स्वव्याकुलतां श्रावयति ?

२. सर्वेषां मरणे कः आत्मानं दोषी मनुते ?

बन्धुशोकेन विह्वल: पार्थं एवं रीत्या स्वबान्धवान् हत्वा विलापमकार्षीत्। पुन: प्रारब्धेन यत् रचितं तत् अवश्यं भवितव्यमिति प्राह:। प्रपञ्चे जातानां प्राणिनां संयोगा: विप्रयोगाश्च ध्रुवं भवति। जलबुद्बुदा इव संयोगा: वियोगाश्च सर्वदा भवन्ति। प्रपञ्चेऽस्मिन् सर्वे संयोगानन्तरं वियोगं प्रति गच्छन्ति। जननादनन्तरं मरणं प्रति गच्छन्ति। सुखस्यानन्तरं दु:खं प्रति यान्ति। एतत् संसारे अपरिवर्तनीयं ध्रुवं सत्यं वर्तते। आलस्यं सुखस्य कारणं परन्तु एतत् दु:खोदयं भवति। कार्ये रते दु:खमनुभूयते परन्तु तत् सुखोदयं करोति। भूति: श्री: ह्री: धृति:सिद्धि: इत्येता: सर्वा: कदाचिदपि आलस्ये न तिष्ठति। धर्मकार्यं सम्पादयितुं विधाता निर्माति परन्तु कर्मत्यागेन पापं वर्धते।

बोधप्रश्ना: –

१. दु:खस्य कारणं किम् ?

२. आलस्ये रते किं भवति ?

## सारांश: —

युधिष्ठिस्य ग्लानिं व्यपादयितुं व्यासदेवः बहुप्रयत्नं चक्रे। परन्तु युधिष्ठिरः शोकसंविग्नमनसा कस्यापि वचनमवगन्तुं न शशाक। ततः व्यासदेवः तं राज्ञः हयग्रीवस्य चरितं श्रावयित्वा दुःखं प्रशमयितुं पयत्नं चकार। हयग्रीवस्य दृष्टान्तमाध्यमेन तस्य कर्तव्यकर्मादीनि प्रतिपादितानि। कालस्य महत्त्वं तथा सर्वे कथं कालस्य कराले वशीभूताः भवन्ति, तस्मिन् विषये अध्यायेऽस्मिन् समुपवर्णितं वर्तते। सर्वेषामुपरि कालस्य प्रभावः नितान्तं पतति। अतः सर्वे कालधीनाः सन्तः सुखदुःखेषु समभावापन्नाः मानवाः संसारे तिष्ठन्ति। सेनजिदुपाख्यानाधारेण कालस्य महिमा तथा यदवश्यं भवितव्यं तत् नूनमेव स्यात्। प्रारब्धे यत् लिखितं वर्तते तत् केनचिदपि भविष्यति। अस्मिन् अध्याये एते सर्वे विषयाः समुपवर्णिताः सन्ति।

# आदर्शप्रश्नाः —

## लघूत्तरीयप्रश्नाः —

१. राजसोत्तमानां लक्षणं लिखत।

२. कालस्य सर्वात्मकतां लिखत।

३. युधिष्ठिरस्य व्याकुलतायाः कारणं लिखत।

## विश्लेषणात्मकप्रश्नाः —

१. सुखदुःखयोः अभिन्नता प्रतिपादयत।

२. कालस्य प्रभावं निरूपयत।

३. युधिष्ठिरस्य ग्लानिं स्पष्टीकुरुत।

## निबन्धात्मकप्रश्नाः —

१. सेनजिदुपाख्यानस्य विशदीकरणं कुरुत।

२. हयग्रीवचरितं स्पष्टयत।

## एकाङ्कप्रश्नाः —

१. दस्युभिः कः मारितः ?

२. दुःखस्य मूलकारणं किम्?

३. भार्गवेण सह कः युद्धं कृतवान्?

४. कौरवाणां प्रथमः सेनाध्यक्षः कः आसीत्?

५. कः द्रोणाचार्यं हतवान्?

६. के सुखमेधन्ते?

७. समुद्रः केन विना न हीयते वर्धते च?

८. कालस्य प्रभावं बोधयितुं कस्य राज्ञः उदाहरणं ददौ?

९. मन्त्रौषधिशिल्पादयः कदा कार्यं न कुर्वन्ति?

१०. कः वारणास्यां कन्यार्थं योद्धुम् आह्वयत्?

११. कः राजा राजसोत्तमो भवति ?

१२. धर्मवित् राजा कः आसीत् ?

१३. सर्वे कस्याधीने तिष्ठन्ति ?

**उत्तराणि —**

१. हयग्रीवः २. आलस्यं ३. भीष्मः ४. भीष्मः ५. द्रुष्टद्युम्ना ६. मूढ़ाः

७. कालेन ८. शेनजितः ९. अकाले १०. भीष्मः ११. धर्मशीलः १२. सेनजित्

१३. कालस्य

# अष्टमोऽध्याय:

## प्रस्तावना –

युधिष्ठिरं प्रति भ्रातर: पत्नी माता गुरवश्च सर्वे स्वबुद्ध्या विस्तारेण सर्वं प्रबोधयामास। तथापि शोकाकुलस्य युधिष्ठिरस्य मनसि शोक: न व्यपगत:। अर्जुन: साक्षात् भगवन्तं श्रीकृष्णं प्रति गत्वा अब्रवीत्। अध्यायेऽस्मिन् श्रीकृष्णस्य युधिष्ठिरं प्रति सर्वाणि रहस्यानि प्रतिपादयामास। कथाप्रसङ्गानुसारं बहुविधानि दृष्टान्तानि प्रतिपादितानि। षोडशराज्ञां वर्णनमस्याध्यायस्य महन्महत्त्वं भजते। प्रारब्धस्य कर्मण: बलवताया: स्वरूपं समुपासितम्। नारदपर्वतयो: कथोपकथनप्रसङ्गे राज्ञ: सृञ्जयस्य चरितवर्णनमपि दृश्यते। यत् किमपि अध्यायेऽस्मिन् पठ्यते तत् सर्वं श्रीकृष्णेन भणितं वर्तते।

## उद्देश्यम् –

अस्मिन् अध्याये भवन्त: सर्वेऽपि एतान् विन्दून् वेदिष्यन्ति।

- अश्मजनकसम्वाद: —
- प्रारब्धस्य बलवत्ताया: प्रबोधनम् —
- श्रीकृष्णस्य युधिष्ठिराय प्रबोधनम् –
- नारदसृञ्जयसम्वाद:
  षोडशराज्ञां वर्णनञ्च—
- नारदपर्वतोपाख्यानम् —

**अश्मजनकसम्वादः —**

शोकातुरेण प्रलापितं युधिष्ठिरं प्रति व्यासदेवः बहु प्रबोधयामास। पुनः दुःखप्रशान्तये व्यासदेवेन पुरातनमश्मगीतमुदाहृतं । कदाचित् प्राचीनसमये विदेहराजजनकः दुःखशोकपरिप्लुतः सन् प्राज्ञं ब्राह्मणं अश्मानं प्रति गत्वा दुखनिवारणाय परिपप्रच्छ। ततः जनकः तान् ब्राह्मणश्रेष्ठान् पप्रच्छ हे ब्रह्मन्! स्वजनानं धनानां च आगमे अपाये वा कल्याणमिच्छता पुरुषेण कथं प्रतिपत्तव्यमतिति । ततः अश्मः प्रत्युवाच हे राजन्! मानवस्योत्पन्नानन्तरं सुखानि दुःखानि च तं पुरुषमभिवर्तन्ते। वायुः यथा मेघं हरति तथैव सुखानि दुःखानि च मानवस्य चैतन्यशक्तिं हरति।

जननानन्तरं मनुष्यः अभिजातोऽस्मि सिद्धोऽस्मि केवलमानुषः नास्मि इति त्रिभिश्चितं प्रसिच्यति। एवं प्रसिक्तमना जनः पैतृकसम्पत्तिं भुंक्त्वा निर्द्धनानन्तरं परस्वानामादानं साधुः इति मन्यते। ततः राजा यथा व्याघ्रमृगादीन् पशून् यथा स्वबाणेन प्रतिषेधति तथैव धर्मोलङ्घनकर्तारं हर्तारं च दण्डयति। परन्तु ये च मानवाः विंशतिवर्षाः त्रिंशद्वर्षाश्च एतानि कार्याणि कुर्वन्ति ते कदाचिदपि शतवर्षं न जीवन्ति। अतः राजा प्रेक्षमाणस्ततः सर्वप्राणभूतां परमदुःखानां बुद्ध्या भेषजमादिशेत्। चित्तस्य विभ्रमस्तथा अनिष्टविषयस्य प्राप्तिकामना मानवस्य मानसिकदुःखस्य कारणं भवति। जरामृत्यू हि समेषां बलिनां दुर्वलानां महतां ह्रस्वनां च भूतानां वृकाविव खादितारौ भवतः। पुरुषः ससमुद्रं वसुंधरां विजित्य अपि जरामृत्युं न अतिक्रामति। भूतानि स्वात्मानं अजरामरमिति चिन्तयति परन्तु तत्विपरीतं जरामृत्यू पूर्वे वयसि मध्ये वयसि तथा अन्ते वयसि च तानि सर्वाणि भूतानि खादतः। सर्वेषां भूतानां जन्ममरणलाभालाभादयः सर्वेऽपि प्रारब्धेन निश्चिताः। यथा शब्दस्पर्शरूपरसगन्धादयः स्वभावेन उत्पद्यन्ते तथा निवर्तन्ते तद्वत् सुखदुःखादीनां विधानं च प्रारब्धकर्मणा विहितम्। प्रपञ्चे वैद्याः अपि अतुराः भवन्ति बलवन्तः कदाचित् सुदुर्बलाः भवन्ति स्त्रीमन्तश्च षण्ढाः भवन्ति। कुले जन्म वीर्य-पराक्रमधैर्यादयः भाग्यानुसारं मानवः प्राप्नोति। अनिच्छासत्त्वेऽपि दरिद्राणां बहवः पुत्राः जायन्ते परन्तु विचेष्टतां समृद्धानां पुत्राः न भवन्ति।

व्याधिरग्निजलशस्त्रवुभुक्षापदविषरज्ज्वापतनञ्चेत्यादीनि भूताानां मरणार्थं भवन्ति। पुनः धनवतः पुरुषस्य पुत्राः यौवने तथा दरिद्राणां पुत्राः क्लेशेन शतं वर्षाणि जीवन्ति।

**बोधप्रश्नाः —**

१. विद्वान् ब्राह्मणः कः ?

२. अश्मः कं प्रबोधयामास ?

३. भूतानां रक्षयिता कः ?

**प्रारब्धस्य बलवत्तायाः प्रबोधनम् —**

धनहीनदरिद्राः चिरजीविनः भवन्ति परन्तु समृद्धे कुले जातेऽपि पतङ्गवत् विनश्यन्ति। लोके श्रीमतां भोक्तुं शक्तिर्न विद्यते परन्तु दरिद्राणां काष्ठन्यपि जीर्यन्ते। स्त्रियोऽक्षा मृगया मद्यपानं व्यर्थालापः इत्यादयः विषयाः पण्डितैः निन्दिताः। परन्तु बहवः शास्त्रविदः अपि एतेषु कार्येषु प्रसक्ताः दृश्यन्ते। ईप्सितान्यनिप्सितानि च कार्याणि कालेन एव सर्वभूतानि स्पृशन्ति। वायुराकाशाग्निश्चन्द्रमासूर्यदिवारात्रं च एतान् सर्वान् कालः एव धारयति पालयति च। शीतमुष्णं तथा वर्षं कालेन परिवर्तते तथैव सुखदुःखमपि मनुष्याणां परिवर्तते। यदा मानवस्य कालः पूर्णतां याति तदानीं हपहोमौषधिमन्त्रतपादीनां प्रभावोऽपि न त्रायते। महोदधौ यथा काष्ठेन सह कदाचित् अन्यकाष्ठस्य मेलनं भवति तथैव भूतानां समागमो भवति। ये पुरुषाः स्त्रीभिर्गीतवाद्यैरुपस्थिताः तथा यः च परस्यान्नं भुङ्क्त्वा जीवनं यापयति, तयोः द्वयोः कृते समदृष्ट्या कालः पश्यति। प्रपञ्चे मातृपितृसहस्राणि तथा पुत्रदारादयः शतानि दृश्यन्ते परन्तु विचारदृष्ट्या कः कस्य पिता माता च ? आत्मा न कस्यचित् बन्धुः न च रिपुः वर्तते।

सर्वे जीवाः अनिच्छासत्त्वेऽपि परलोकं प्रति गच्छन्ति। मासाः पक्षाः क्षपाः अहानि च पुनः न निवर्तन्ते। जन्ममरणस्य इयं धारा अव्याहततया चलति चलिष्यति च। अस्मिन् जगति केनचित् सह सर्वदा स्थातुं न शक्यते यदि शरीरात् आत्मनः छिन्नो भवति तर्हि एकेन सह कथं वा समागमो भवति। जनकं प्रति पुनः अश्मः प्रबोधति भवतः पितृपितामहादयः भवन्तं न द्रष्टुं शक्नुवन्ति भवानपि तान् न द्रष्टुं शक्नोति। देवपितृमहर्षीणाम्

ऋणमसूयारहिते सति सर्वादौ ब्रह्मचर्यं पालय ततःगृहस्थाश्रमे प्रविश्य सन्तानोत्पत्तिं कृत्वा यजेत। पुनः राज्ञः धर्मविषये प्रतिपादयति यत् यः राजा धर्मशास्त्रानुसारं विधिमर्यदायां करस्य ग्रहणं करोति सः लोके विख्यातो भवति। ततः जनकः एतत् सर्वं श्रुत्वा शान्तमनसा अश्मानमामन्त्र्य स्वं गृहं प्रति ययौ। तदेव व्यासः संक्षेपेण युधिष्ठिरं प्रति उवाच यत् हे युधिष्ठिर! त्वया क्षात्रेण धर्मेण मही जिता वर्तते अतः मा विषादीः ।

**बोधप्रश्नाः –**

१. अश्मनः सम्वादं कः श्रावयामास ?

२. राजा केन विधिना राज्यं पालयति ?

## श्रीकृष्णस्य युधिष्ठिराय प्रबोधनम् –

सर्वेषां बोधनानन्तरमपि युधिष्ठिरस्य मनसि विषादः न गतः। ततः अर्जुनः श्रीकृष्णस्य समीपं गत्वा धर्मराजयुधिष्ठिरस्य ज्ञातिशोकाभिसंतप्तो विषादः प्रोवाच। श्रीकृष्णमतिरिच्य न कोऽपि युधिष्ठिरस्य शोकविषादमपहर्तुं न शक्नोति। बाल्यावस्थायां श्रीकृष्णः अर्जुनादपि अतिप्रियो बभूव। ततः श्रीकृष्णः युधिष्ठिरं प्रबोधयितुं समागतः। ये जनाः कुरुक्षेत्रे दिवं गताः ते सर्वे केनापि प्रकारेण प्रत्यागन्तुं न शक्नुवन्ति। यथा स्वप्नलब्धाानि वस्तुनि स्वप्नस्य समाप्त्यनन्तरं व्यतीताः भवन्ति तथैव ये रणे व्यतीताः तेषामपि दर्शनमशक्यम्। सर्वे शूराः ह्यभिमुखाः विगताः परन्तु कश्चित् पृष्ठतः पलायन्वापि पातितः। पुनः कुरुक्षेत्रे सर्वे प्राणान्त्यक्त्वा स्वर्गे लोके निवसन्ति ।

**बोधप्रश्नाः –**

१. अर्जुनः कस्य समीपे युधिष्ठिरविषये प्राहः ?

२. युधिष्ठिराय कः रोचते ?

**नारदसृञ्जयसम्वाद: —**

**षोडशराज्ञां वर्णनम् —**

पुराकाले पुत्रशोकार्तं सृञ्जयं देवर्षि: नारद: उपदेशं प्राह:। सुखदु:खै: सर्वे प्रजा: अहं त्वं च सर्वे चरिष्याम: अत्र का परिवेदना वर्तते। पुराकाले महाभाग्यपरराज्ञां विषये यदुच्यते तच्छुत्वा शोक: प्राहास्यति। कदाचित् अविक्षितस्य पुत्र: मरुत् नाम्ना कश्चित् विख्यात: भूपति: आसीत्। सोऽपि परलोकं गत:। तस्य च राज्ञ: यज्ञे देवगुरु: बृहस्पति: तथा देवराज: इन्द्र: वरुणादय: सर्वे उपस्थिता: आसन्। तदानीं पृथ्वी शस्यश्यामला आसीत्। महात्मन: यज्ञे विश्वदेव: सभासद् तथा साध्याश्च परिवेष्टार: आसन्। मरुद्गणा: आगत्य बहु सोमरसं अपिबन्त। दक्षिणाप्रदाने राजा सर्वान् देवान् मनुष्यान् गन्धर्वान् अत्यरिच्यन्त। धर्मज्ञानवैरागैश्वर्यादिविषयेऽपि भवतोधिकस्य राज्ञ: मरुतस्य परलोकगमनमभुत्। अत: पुत्रनिमित्तं शोक: न कर्तव्य:।

वैतिथि-सुहोत्र: नाम्ना अपि एक: विख्यात: राजा आसीत्। तस्य च राज्ञ: राज्ये इन्द्र: एकवर्षं यावत् सुवर्णवृष्टिमकरोत्। सुहोत्रं लब्ध्वा पृथ्वी वसुमती नाम्नी विख्याता जाता। तदानीं सर्वा: नद्य: हिरण्यमवहन्। राजा सुहोत्र: राज्ये शतानि स्वर्णमयानि मत्स्यमकरकूर्मादीनि भूतानि दृष्ट्वा विस्मितोऽभवत्। स: अपि भवतोधिक: पुत्रादपि श्रेष्ठ: आसीत्, य: समये दिवं गत:। अत: पुत्रशोक: मा कुरु।

पुन: एक: राजर्षि: अङ्गराज: वृहद्रथ: आसीत् य: सहस्रं श्वेतान् अश्वान् असृजत्। पुन: सहस्रं सहस्राणां हेमविभूषिता: कन्या: यज्ञे दक्षिणारूपेण ददौ। दानकारणत: देवदानवगन्धवादीन् अपि अत्यरिच्यत। अग्निष्टोमात्यग्निष्टोमोक्तथषोडशीवाजपेयातिरात्राप्तोर्यामादय: सप्तसोमसंस्थानां यजनं कृत्वा यथा धनदानं कृतं न तथा केनचित् करिष्यते न च कृतम्। एषोऽपि मृत्युं प्राप्तवान्।

उशीनरस्य पुत्रस्य शिबे: अपि मृत्युरभूत्। य: शिबि इमां पृथिवीं कृत्स्नां चर्मवत् समवेष्टयत्। स: समस्तान् अरीन् हत्वा एकच्छत्रां महीं चक्रे। एतादृश: राजा अपि मृत्युं प्राप्तवान्। अत: मा शोची।

ऐश्वर्यवान् शकुन्तलाया: गर्भादपि उत्पन्नस्य भरतस्य मृत्युरभूत्। एष: राजा भरत: सहस्रम् अश्वमेधयज्ञं एकशतं राजसूययज्ञं चकार। यथा मनुष्य: बाहुवलेन आकाशे गमनं कर्तुं न शक्नोति तथैव तदानीं भरतस्य न कश्चित् अनुगामी आसीत्। सोऽपि मृत्युं प्राप्तवान्।

भगवतः साक्षात् अवतारभूतः दशरथस्य पुत्रः रामचन्द्रोऽपि शरीरं तत्याज। यः सदा प्रजाः स्व-औरसपुत्रवत् पालयामास। रामराज्यमेतावता श्रुयते यत्र न दुःखं न शोकः न अलाभः आसीत्। समये वर्षाः अभूवन्। कदाचिदपि दुर्भिक्षः नासीत्। रामराज्ये कस्यापि किमपि भयं नासीत्। पादपाः अपि सर्वदा पुष्पफलान्विताः आसन्। दश अश्वमेधयज्ञं चक्रे। गजसदृशपराक्रमी अपराजयः सः रामः अपि स्वशरीरं तत्याज।

पूर्वं भगीरथ नाम्ना कश्चित् नृपः आसीत्। तस्य यज्ञे सोमं पीत्वा देवराजः इन्द्रः मदोत्कटेन असुरान् ममार। एषोऽपि सहस्रसंख्यकाः कन्याः दक्षिणारूपेण ददौ। तस्य च भगीरथस्य पुत्री गङ्गा त्रिषु लोकेषु विख्याता आसीत्। सोऽपि धर्मार्थज्ञानवैरागैः श्रेष्ठः परन्तु समये प्राप्ते कालेन ग्रासितः।

महात्मा दिलीपः आपि मृतः आसीत्। यस्य च कर्माणि भूरीणि कथयन्ति । इमां पृथ्वीं ब्राह्मणेभ्योः दानं ददौ। एतस्य यज्ञे विशालः यूपस्तम्भः आसीत्। दिलीपस्य मार्गे स्त्रियः अपि हेमसम्पन्नाः भूत्वा शेरते स्म। तस्य दर्शनं यः चकार सोऽपि स्वर्गलोकं गतः। एषोऽपि धर्मार्थज्ञानवैराग्यैः युक्तः सनपि कालेन ग्रासितः।

युवानश्वस्य पुत्रः महाराजः मान्धाताऽपि कालेन नाशितः। कदाचित् युवानश्वः यज्ञस्य दधि स्वयमखादीत् ततः तस्य गर्भः आगतः। मरुतः पितृगर्भात् तं निसारयामास। ततः देवराजः इन्द्रः तस्य बालकस्य नाम मान्धाता इति चक्रे। तस्य मुखे इन्द्रः स्वस्य हस्तं स्थापयामास। तस्मात् हस्ताङ्गुलितः पयसः धारा अस्रवत्। ततः सः बालः एकस्मिन् दिने एव शतदिनं व्यवर्धत। द्वादशदिनैव द्वादशवर्षस्य बालः अभूत्। एषः सर्वान् नृपान् समरे अजयत्। मान्धाता शतम् अश्वमेधयज्ञं तथा शतं राजसूययज्ञं चक्रे। एषोऽपि कालेन मारितः।

ससागरं इमां पृथ्वीं जित्वाऽपि नहुषपुत्रः ययातिः कालेन ग्रासितः। ययातिः देवदानवयुद्धे दानवान् निहत्य पृथ्वीं व्यभजत्। एषः ययातिः अपि श्रेष्ठ।

नाभागपुत्रस्य अम्बरीषस्यापि मृत्युरभवत्। बहूनां ब्राह्मणानां सहायार्थं राजा अम्बरीषः दक्षिणां तेभ्यो ददौ।

चित्ररथस्य पुत्रः शशविन्दुः अपि दिवं गतः। एतस्य वंशानुचरितं सर्वत्र श्रुयते। ब्राह्मणेभ्योः दानं एषोऽपि दत्तवान्। परन्तु परिशेषे सः कालेन ग्रासितः। अस्य च राज्ञः लक्षसंख्यकाः भार्याः आसन्। अस्याः सकाशात् सर्वेऽपि उत्तमधन्विनः हिरण्यकवचाः पुत्राः जज्ञिरे। प्रत्येक राजपुत्रः शतं कन्याभिः सह विवाहमकरोत्।

रथसुवर्णमालागजादयः कन्याभिः सह आगताः। समस्तं धनं राजा शशबिन्दुः अश्वमेधे यज्ञे ब्राह्मणेभ्योः दत्तवान्। एषोऽपि राजा धर्मार्थज्ञानवैराग्यैः श्रेष्ठः आसीत्। परन्तु काले प्राप्ते स्वर्गं जगाम।

अमूर्तरयसस्य पुत्रः गयः अपि कालेन ग्रासितः। यः शतं वर्षाणि यावत् यज्ञस्यावशिष्टान्नं भुङ्क्त्वा अतिष्ठत्। ततः अग्निदेवः साक्षात् तस्मै कदाचिदपि दाने धर्मे श्रद्धा वर्धतामिति वरं ददौ। सः अपि वरं वव्रे यत् दाने धनं कदाचिदपि न समाप्तं भविष्यति। अग्निदेवः तस्य सर्वाभिलाषं पूर्णमकरोत्। महातेजस्वी गयः सहस्रं वर्षं यावत् दर्शपौर्णमासचातुर्मासाश्वमेधादीन् यज्ञान् ययाज। प्रतिदिनं प्रातः शतं गवां तथा शतमश्वानां दानं प्रादात्। दानधर्मे सोऽपि श्रेष्ठः परन्तु काले प्राप्ते विनाशं ययौ।

संकृतेः पुत्रः रन्तिदेवोऽपि चिरकालं पृथिव्यां न स्थातुं समर्थो नासीत्। इन्द्रः प्रसन्नो भुत्वा यं राजानं वरं ददौ। सर्वदा राज्ये बहु अन्नं भविष्यति, सर्वदा अतिथीन् लभे। श्रद्धा कदाचित् न व्यगमत्। अस्य यज्ञे गावः तथा पशवः साक्षादेव उपस्थिताः अभूवन्। यज्ञे पशूनां रुधिरे एका नदी सुस्रुवे या चर्मण्वती नाम्नी विख्याता जाता। सर्वाणि यज्ञपात्राणि अस्य सुवर्णमयानि तथा यज्ञे सर्वाणि वस्तूनि सुवर्णमयानि आसन्।

इक्ष्वाकुवंशोद्भः राजा सगरोऽपि परलोकं गतः। पुरा मही एकच्छत्रा आसीत्। अश्वमेधसहस्राणि एषः तर्पयामास। यज्ञसम्पन्नानन्तरं ब्राह्मणेभ्यो यथेष्टं धनं कन्यां वा ददौ। एषः राजा सगरः कोपात् समुद्रं खानयामास । अस्मादेव कारणात् समुद्रस्य नाम सागर इति बभूव।

राज्ञः वेनस्य पुत्रः पृथुः अपि धरापृष्ठे चिरकालं न अतिष्ठत्। महर्षयः यं पृथुं महारण्ये सम्भूय अभ्यषिञ्चन्। पृथोः समये पृथिवी अकृष्टपच्या आसीत्। वृक्षस्य पुटके पुटके मधु आसीत्। यदा पृथुः समुद्रयात्रां अकरोत् तदानीं समुद्रः स्थिरो भवति स्म। एषः पृथुः अपि समये देवलोकं जगाम।

ततः एवं रूपेण षोडशराज्ञां चरितं नारदः सृञ्जयं श्रावयामास। ये च सर्वेऽपि नृपाः कालस्य प्रभावेण विगताः। दानधर्मादि कृत्वाऽपि ते चिरकालं महीं न पालयामास। ततः नारदः तस्मै हिरण्यनाभाख्यं पुत्रमेकं ददौ। यः सहस्रवर्षं यावत् पृथिव्यां स्थास्यति।

**बोधप्रश्नाः –**

१. गयस्य पिता कः ?

२. सृञ्जयं कः प्रबोधयामास ?

३. वेनस्य पुत्रः कः ?

## नारदपर्वतोपाख्यानम् —

श्रीकृष्णेन षोडशराज्ञां वर्णनप्रसङ्गे युधिष्ठिरः सुवर्णष्ठीवीराज्ञः विषये पप्रच्छ। किमर्थं पर्वतेन सुतो दत्तः केन सः ममार ? तस्य चरितं यथाविधि श्रीकृष्णेन श्रावितम्।

कृत्स्ने लोके नारदपर्वतौ लोकेषु पूजितौ आस्ताताम्। कदाचित् नारदपर्वतौ द्वौ भ्रमणार्थं मर्त्यलोकमागतौ। अन्नघृतादिकं भोक्तुं मातुलः नारदः भागिनेयश्च पर्वतः सम्प्राप्तः। तावुभौ ब्रह्मचारिणौ चतुर्वारं मानुषान् भोगान् भुञ्जानौ। यदि शुभो वाशुभः हृदि भवेत् तत् सहसा अन्योन्यस्य आख्येयो भवेत् अन्यथा शापेन ग्रस्तो भविष्यति। ततः द्वौ राजानं सृञ्जानं प्रति गत्वा स्थातुमनुमतिं ययाचतुः। सृञ्जयः तौ द्वौ प्राहः हे भगवन्तौ मम एकैव कन्या भवतोः सेवां करिष्यति। ततः सृञ्जनः पितृदेववत् सेवां समाचरितुं कथयामास।

कदाचित् सेवा समये नारदस्य मनसि कामभावना समागता। एवं सत्त्वेऽपि स्वकामभावं कदाचिदपि नारदः न शशंस। ततः महर्षिः पर्वतः नारदस्य चेष्टां दृष्ट्वा क्रुद्धः सन् शशापेन पूर्वसङ्कल्पितकर्म वुबोध। ततः पर्वतः नारदं कन्यया सह विवाहानन्तरं लोके त्वां मर्कटसदृशं द्रक्ष्यन्ति। नारदोऽपि तं शशाप यद्यपि भवानपि तपसा ब्रह्मचर्येण धर्मेण सत्येन च युक्तो वर्तते तथापि स्वर्गवासं नाप्स्यति। ततः तौ द्वौ परस्परं भृशं शप्त्वा अन्योन्यं प्रतिजग्मतुः। ततः पर्वतः पृथिव्यां सर्वत्र यथान्यायं स्वतेजसा पूज्यमानः सन् विचचार। सृञ्जयराज्ञः कन्यां धर्मेण सः धर्मप्रवरः नारदः उपयेमे। सा कन्या नारदं यथाशापग्रस्तं वानररूपेण ददर्श। तं देवर्षिं नारदं सा कन्या वानररूपेण दृष्ट्वा नैवावमन्यत । सा पतिवत्सला कन्या देवं मुनिं यक्षं वा मनसा अपि न अचिन्तयत्। कदाचित् वने भ्रमन्तं नारदं दृष्ट्वा विधिपूर्वकं प्रणामं कृत्वा स्वर्गलोकं प्रति गन्तुं प्रोवाच। वानरः भविष्यति भवानिति भवता अहं प्रथमं शप्तो वर्तते। पुनः मत्सरतावशतः मया अपि भवते शापः दत्तः। ततः एकमन्येन

शापात् निवर्तयेतामिति। ततः देवर्षिर्नारदः पूर्ववत् अभूत्। सुकुमारी सा कन्या देवर्षिं दृष्ट्वा परपत्यभिशङ्कया जगाम। पर्वतः तां कन्यां प्रति उवाच हे सुनयने! एषः तवैव पतिः । एतच्छ्रुत्वा नारदमहर्षिः स्वगृहं तथा पर्वतः स्वर्गलोकं जगाम।

ततः श्रीकृष्णः युधिष्ठिरं प्रति अब्रवीत्। हे भारत! साक्षात् इतः परं नारदमहर्षिः भवन्तं सर्वं वक्ष्यन्ति।

**बोधप्रश्नाः —**

१. नारदपर्वतसम्वादं कः कथयामास ?

२. पर्वतनारदयोः कः सम्बन्धः ?

## सारांशः —

अध्यायेऽस्मिन् युधिष्ठिरस्य शोकं प्रशमयितुं श्रीकृष्णस्य तथा व्यासस्योपदेशः प्रस्तुतः। व्यासदेवः ब्राह्मणेन अश्मना जनकः यथा प्रतिबोधितः तत् सर्वं प्रतिपादयामास। कालस्य धनस्य तथा ऐश्वर्यस्य च वर्णनं कृत्वा प्रारब्धस्य कर्मणः प्रभावद्वारा सर्वं प्रतिष्ठितमिति कथयामास। धर्मज्ञानकर्मैश्वर्यणां वर्णनं कृत्वा षोडशराज्ञां च दानधर्मादिकं प्रस्तुतम्। सर्वेऽपि कालस्य कराले प्राभावे वशीभूताः भवन्तीति प्रतिपादितम्। सृञ्जयस्य पुत्रशोकं निवारयितुं नारदः तस्मै उपदेशं ददौ। पर्वतनारदयोः अन्योन्यः शापप्रसङ्गः तथा महर्षेः नारदस्य कामुकतायाः प्रसङ्गः प्रतिपादितः।

# आदर्शप्रश्नाः —

## लघूत्तरीयप्रश्नाः —

१. प्रारब्धकर्मणः सर्वात्मकतां लिखत।

२. बृहद्रथस्य चरित्रं स्पष्टयत ।

## विश्लेषणात्मकप्रश्नाः —

१. पर्वतस्य शापप्रसङ्गं प्रतिपादयत।

२. सुहोत्रस्य गारिमा स्पष्टयत।

३. भगवतः श्रीरामस्य राज्यशासनं विवृणोत।

## निबन्धात्मकप्रश्नाः —

१. नारदपर्वतोपाख्यानस्य समीक्षणं विशदयत।

२. षोडशराज्ञां चरितं निरूपयत।

३. अश्मनः प्रबोधनं प्रतिपादयत।

## एकाङ्कप्रश्नाः —

१. सुहोत्रः कस्य पुत्रः ?

२. विद्वान् ब्राह्मणः कः ?

३. कः अश्मानं प्रति जगाम ?

४. दशरथस्य कनिष्ठः पुत्रः कः ?

५. पर्वतस्य मातुलः कः ?

६. कस्य राज्ञः कन्यां नारदः उपयेमे ?

७. श्रीकृष्णं कः आह्वयामास ?

८. भरतस्य माता का ?

९. नाभागस्य पुत्रः कः ?

१०. विदेहराजः कः ?

११. भारतमिति कस्य नामानुसारं बभूव ?

१२. ययाति कस्य पुत्रः ?

१३. गयः कस्य पुत्रः ?

१४. गङ्गायाः पिता कः ?

**उत्तराणि —**

१. वैतिथेः २. अश्म ३. जनकः ४. शत्रुघ्नः ५. नारदः ६. सृञ्जयस्य

७. अर्जुनः ८. शकुन्तला ९. अम्बरीशः १०. जनकः ११. भरतस्य १२. नहुषस्य

१३. अमृतरयसस्य १४. भागिरथि